स र्वा स्स मुद्ध रे द्वाजा पि ते व व्य स नात प्र जो॥ न्या मा नं च्या मि ना धी रो य न्या ग
व प ति गं जा स॥ ए वं वि धो न र प ति र्वि मा ने ना कि व द्यी सा॥ सिध्र ये ठा रु भं क्षात्त्र भिद्व ता
स ह मो द ते॥ सी द त्व वि प्रो व पा व्वृ त्ता प ये रे वा प द म रे त॥ स्व ड्गे ने वा प रा ज्ञा नो न स हत्या
क पं च ज॥ वै स्प वृ त्या उ रा ज न्यो जी वे च्छ ग य पापि च॥ च रे द्वा वि प रू पे र पा न स हत्या क

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चमाचमनं स्नानं संध्योपास्ति र्म्मि मार्च्चि नं॥ तीर्थसेवा जपो स्वाध्याय भक्त्या संभाषवर्जनं॥
सर्वीस्य मप्रवृत्तो पश्चि यमः क्रन्नन्द्रनं॥ मतभाव स्सर्वेक्षु तेषु मनोवाक्काय संयमः॥ एवं
बहुद्ध्ता ध रोबाह्म ... योगिनरि व च्चु लवं॥ मत भतास्तीव तपसा दग्ध कर्म्मा शयोमलः
ब छ्यानन्तर मावेद्य ... यपाजिबासिताग मः॥ गुरवेद ... क्षिणां दत्वा स्नायात् गु
न वनुमोदितः॥ गृ ... हकनं वो पवि रोत प्रबुजै बद्धा ... द्विजोत्तमः॥ आश्रमाद्
श्रमं गच्छेद् ब्रान्यथा ... महापरस्य रैत॥ गृहास्थी सद्दशोभा या मुद्वहेदजुगुप्सितां॥
यवीयसीं तु वयसा पांसवर्णिं मनुक्रमात्॥ इज्याध्ययनदानानि सर्वेषां द्विजन्मनां॥ प
तिग्रहोद्ध्यापनं च ब्राह्मणास्यैव याजनं॥ प्रतिग्रहम्मन्यमान स्तपस्तेजो यशोनुदं॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चार्यगोविप्रगुरुवृद्धसुराञ्छुचिः॥ समाहित उपासीत संध्ये च यतवाग्जपन्॥ आचार्यं मां वि
जानीयान्नावमन्येत कर्हिचित्॥ न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः॥ सायंप्रातरुपासीत्
भैक्षं तस्मै निवेदयेत्॥ यच्चान्यदप्यनुज्ञातमुपयुञ्जीत संयुतः॥ शुश्रूषमाण आचार्यं
सदोपासीत नीचवत्॥ यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः॥ एवं वृत्तो गु
रुकुले वसेद्भोगवि वर्जितः॥ विद्या समाप्यते यावद्बिभ्रद्व्रतमखण्डितम्॥ यद्य
सौ छन्दसां लोकमारो क्ष्यन्ब्रह्मविष्टपं॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः
अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः॥ स्त्री
णां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं॥ प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत्॥ शौ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पचपेवैरवप्रकृतयस्त्विमाः। रुरूष पाद्विजगवाद्वैवानामप्यमापया॥ तत्र लब्धं नस
तोषत्स्यद्प्रकृतयस्त्विमाः॥ शौचमनृतं स्तेयं नास्तिक्यं रुक्षविग्रहः॥ कामः क्रोध स्वतंष
रवरवभावोतोवसापि नाँ॥ अहिंसा सत्यमस्तेयमकामक्रोधलोभता॥ भूतप्रियहितं
ब न वाक्षधर्म्यं यं सार्वव र्णिकः॥ द्वितीयं प्राप्यानुपूर्व्या जन्मोपनयनद्विजः॥ व
सबण्डरुकुलेशतो ब्रह्माधीयीत वाग्यतः॥ मेखला जिनदण्डदाब्रह्मधीपी
सवास्त्रवकमण्डलू जटिलो धौतदत्त्वस्य वासः पीतकवान्दद्दे॥ स्नानभोजन
होमेषु जपोच्चारे च वाग्यतः॥ न छिन्द्यान्नखरोमाणि कक्षोपस्थगतान्यपि॥ रेतो नावं
किरेज्जातु ब्रह्मव्रतधरः स्वयं॥ व्रतीव्यावगाह्याप्सु यतासुर्जपदीत पेतु॥ न व्यकी

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रणव एवागो धर्म्मोहं वृषरूपधृक् ॥ उपासंजे तपोभि ष्पाहं सा मा म्मुना । किरबि षाः एतामु
स महाभाग प्राणान्मे ददपाज यी ॥ विद्याप्रादुरभूत्तस्या ब्रह्ममासंभि हेन्म खः विपश्चिन्‌नि
यविटंक द्रामुख बाहु रूपादजाः ॥ वैराजात्पुरुषाज्जाताय आमाचोरलक्ष्मणाः ग्र
हास्त्रमौज वनतो ब्रह्मे चर्य्यं हृदो मम ॥ वक्षस्थलाद्वने बासस्सन्यासः सोषण
स्थितः ॥ वर्णानामाश्र माणां च जन्म भूम्यनुसारिणीः ॥ आसन्प्रकृतयो नृणां
नीचैर्नीचोत्तमोत्तमाः ॥ शमो दमस्तपश्शौचं संतोषः क्षान्तिरार्जवं ॥ मद्भक्तिश्च द
यासत्यं ब्रह्मप्रकृतयस्त्विमाः ॥ तेजो बलं धृतिश्शौर्य्यं तितिक्षौदार्य्यमुद्यमः ॥ स्थैर्य्यं ब्रह्मण्यमै
श्वर्य्यं क्षत्रप्रकृतयस्त्विमाः ॥ आस्तिक्यं दाननिष्ठा च अदंभो विप्रसेवनं ॥ अतुष्टिरर्था

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मर्हसि॥ पुरा किल महाबाहो धर्मं परमकं भवान्॥ यमाह हंसरूपेण ब्रह्मणे
भ्यात्थ माधव॥ स इदानीं सुमहता कालेनामित्रकर्शन॥ न प्रायो भविता मर्त्यलोके प्राग
नुशासितः॥ वक्ता कर्ताविता नान्यो धर्मस्याच्युत ते भुवि॥ सभायामपि वैरिं
ब च्यां यत्र मूर्तिधराः कलाः॥ कर्त्राविज्ञा प्रवक्त्रा च भवता मधुसूदन॥ त्यक्ते
महीतले देव विनष्टं कः प्रवक्ष्यति॥ तत्त्वमतः सर्व धर्मज्ञ धर्मस्त्वद्भक्ति
लक्षणः॥ यथाय स्य विधीयेत तथा वर्णय मे प्रभो॥ भगवान्॥ धर्म्य एष तव
प्रश्नो नैःश्रेयसकरो नृणाम्॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे॥ आदौ कृतयु
गे वर्णो नृणां हंस इति स्मृतः॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः॥ वेदः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

टिराः॥ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागस्सौभगं भगः॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽ
शकः॥ एतास्ते कीर्तितास्सर्वास्संक्षेपेण विभूतयः॥ मनोविकारा एवैते यथा वाचाभिधीयते॥ वाचं
यच्छ मनो यच्छ प्राणां यच्छेन्द्रियाणि च आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने॥ यो
वै वाचा मनसी सम्यङ्असं यच्छन्धिया यतिः॥ तस्य व्रतं तपो दानं स्रवत्यामघटाम्बुव
त्॥ तस्मान्मनो वचः प्राणान्नियच्छेन्मत्परायणः॥ मद्भक्तियुक्तयाभत्या
बुद्ध्या ततः परिसमा प्यते॥ इति श्रीभागवते एका दशस्कन्धे षोडशोध्यायः
॥ उद्धव उवाच॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदा
मपि॥ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत्॥ स्वधर्मेणारविंदाक्ष तन्ममाख्यातु

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रा॥ विखावसुः प्रवं चित्ति गन्धर्वाप्सरसां महं॥ भूधराणामहं स्थैर्यं गन्धमात्रमहं भु
वः॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः॥ प्रभा सूर्येन्दुताराणां शब्दो हं नभसः परः॥
ऊहं लयानां बलिरहं वीराणामहमर्जुनः॥ भूतानां स्थित्युत्पत्ति रहं वै प्रति
संक्रमः॥ गत्युक्त्युत्सर्गोपादानमानन्दस्पर्शदर्शनैः। आस्वादश्रुत्यवघ्राणा
महं सर्वेन्द्रियेन्द्रियं। पृथिवी वायुराकाशमापो ज्योतिरहं महान्॥ विकारः पु
रुषो व्यक्तं रजस्सत्वं तमः परं॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्वविनिश्चयः॥ म
येश्वरेण जीवेन गुणेन गुणिना विना॥ सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित्॥
संख्यानं परमाणूनां कालेन क्रियते मया॥ न तथा मे विभूतीनां सृजतोण्डानि को

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नारायणो मुनीनाञ्च कुमारो ब्रह्मचारिणां॥ धर्म्माणामस्मि सन्न्यासः क्षेमाणामबहिर्म्मतिः॥
गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं॥ संवत्सरोऽस्म्यनिमिषां ऋतूनां मधुमाधवौ॥
मासानाम्मार्गशीर्षो ऽहन्नक्षत्राणान्तथाभिजित्॥ अहं युगानाञ्च कृतं धीराणान्देव
लोऽसितः॥ द्वैपायनो ऽस्मि व्यासानां कवीनां काव्य आत्मवान्॥ वासुदेवो भग
वतान्त्वन्तु भागवते ष्वहं॥ किम्पुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः॥
रत्नानां पद्मरागो ऽस्मि पद्मकोशः सुपेशसां॥ कुशोऽस्मि दर्भजातीनां गव्यमाज्यं ह
विःष्वहं॥ व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्व
वतामहं॥ ओजः सहो बलवतां कर्म्माहं विद्धि सात्वतां॥ सात्वतान्नवमूर्त्तीनामादिमूर्त्तिरहम्प

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चैःश्रवास्तुरंगाणां धातूनामस्मि काञ्चनं।। यमः संयमतां चाहं सर्पाणामस्मि वासुकिः।। ना
गेन्द्राणामनन्तोहम्मृगेन्द्रः शृंगिदंष्ट्रिणां।। आश्रमाणामहं तुर्यो वर्णानां प्रथमोनघ। तीर्था
नां स्रोतसां गंगा समुद्रः सरसामहं।। आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां।
धिष्ण्यानामस्म्यहम्मेरुर्गहनानां हिमालयः।। वनस्पतीनामश्वत्थ ओषधी
नामहं यवः।। पुरोधसां च वसिष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः।। स्कन्दोहं स
र्वसेनान्यामग्रण्यां भगवानजः।। यज्ञानां ब्रह्मयज्ञोहं व्रतानामविहिंसनं। वाय्व
ग्न्यर्काम्बु वागात्मा शुचीनामप्यहं शुचिः।। योगानामात्मसंरोधो मंत्रोस्मि विजिगीषतां।।
आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां।। स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः।

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः॥ गुणिनामप्यहं सूत्रं महतां च महानहं॥
सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः॥ हिरण्यगर्भो वेदानां मन्त्राणां प्रणवस्त्रिवृत्॥
क्षराणामकारोऽस्मि पदानिच्छन्दसामहं॥ इन्द्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट्॥
आदित्यानामहं वि ष्णू रुद्राणां नीललोहितः॥ ब्रह्मर्षीणां भृगुरहं राज
र्षीणामहं मनुः॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु॥ सिद्धेश्वराणां
कपिलस्सुपर्णोऽहं पतत्रिणां प्रजापतीनां दक्षोऽहं पितॄणामहमर्यमा॥ मां वि
द्ध्युद्धव दैत्यानां प्रह्लादमसुरेश्वरं॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां॥ ऐराव
तं गजेन्द्राणां यादसां वरुणं प्रभुं॥ तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिं॥ उ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ङ पासि नाः प्र प द्य ते सं सि द्धिं त द्व द स्व मे॥ अ ढ स्व र सि क्ष ते षु क्ष ण मा क्ष त भा व नः
ने वी प रय क्लि ष्ट ता नि प रय सम्मोहि ता नि ते॥ यः का स्व भ्न मौ दि वि वा र सा यं वि भ्न त यो दि द्रुम
हा वि भ्न तेः॥ ताम ब्रु मा रव्या ह्य नु भ्रा वि ता स्ते न मा भि ते ती र्थि प वं ङि प र्स॥ म
गु वा न्॥ त त मे व कु म ठ पृ षः प्र त्नं प्र रन वि दौ व र॥ यु पु त्तु ना वि न रा वे सप
नैं र जुं वे न वै॥ ज्ञा वा ज्ञा ति क धं ग र्हि म ध र्म्मि रा अ हे ड कं॥ त तो नि ष्ट ता
ह मा ठ ह तों ढ मि ति लौं कि कः॥ स त दा पु रु ष व्या घो यु त्या मे प्र ति बो धि तः॥ अ भ्य मा
ष त मा मे वं य प्या त्व र णा म्न द्ध नि॥ अ ह मा त्मो द्ध वा मी षां क्ष ता नां सु दृ दी स्व रः॥ अ हं स र्वा
णा भ्न ता नि ते षां स्थि त्य स्त भ वा प्य यः॥ अ हं ग ति र्ग ति म तां का लः क ल य ता म हं॥ ७६

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

याबदव्वैताव्वत्तौ योगमुत्तमे॥ मयासंपद्यमानस्य कालंकनुपणाहेतवः॥ जनौ
पतितःपोमतेपीनतीऽरडसिद्धः यः॥ योगेनाप्रोतितासर्वः नाक्षे योगगतिं तुजेतः॥
सदीसामपसिद्धी नांडेडःपतिरहंप्रभुः॥ अहं योगस्य सौख्यस्य धर्मस्य
बल्लभकिंगॉ॥ अड मामाश्चरोबाङ्मोनाव्टतस्सर्व देहिनौ॥ यत्याञ्चतामि
मृतेषुबहिरघ स्वढंत्तया॥ ऊनतिप्रकादरा स्कन्धेपञ्चाकरोध्यापः
ऊडक्कवः॥ तेब त्मपरमंयोमसाध्याद्वानाद्यन्तमनादृतां॥ सर्वैःपामपिभूता
नांप्राणास्थित्यपायोत्तमवः॥ उद्याववेषुभूतेषुदुर्जयमकृतामभि॥ उपासतेतां
मेगवव्यायातप्येनबात्मगणः॥ येषुयेषुचभावेषुस्यायांपरमपंचः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

कल्पयेत्बुद्ध्या यदा वा मत्परः पुमान्॥ मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते॥
यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान्॥ न कुतश्चिन्न हन्येत तस्य चाज्ञा यथा
मम॥ मद्भक्त्या शुद्धसत्वस्य योगिनो धारणाविदः। तस्य त्रैकालिकी बुद्धि
र्जन्ममृत्यूपबृंहिता॥ अग्न्यादिभिर्न हन्येत मुने र्योगमयं वपुः॥ मद्यो
गशान्तचित्तस्य यादसामुदकं यथा॥ मद्विभूती रभिध्यायन् श्रीवत्सा
स्त्रविभूषिताः॥ ध्वजातपत्रव्यजनैः स भवेदपराजितः॥ उपासकस्य मा
10 मेवं योगधारणया मुनेः॥ सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः॥ जितेन्द्रियस्य
दान्तस्य जितश्वासात्मनो मुनेः॥ मद्धारणां धारयतः का नु सिद्धिः सुदुर्लभा॥ अन्तरा

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हितो मरः॥ स्मप्याश्चात्मनि प्राणे मनसा बोषमुद्वहन्॥ तचोपलभ्यमानां हंसोश
चस्थूलोत्यसौ॥ चक्षुस्वप्नेऽरिस योज्यलप्रारमपि चक्षुषि॥ मासत्रे मनसा ध्यायन्विश्वं
पश्यति सूक्ष्म दृक्॥ म नोमयि सुसी योज्य देहक दनुवायुना॥ मद्धारणा
नुभावेन तत्रामायु त्रवैमनः॥ यदा मनउपादाय यद्युद्दपिबुभृषति॥
ततगवेभ्म. नोरूपं म्मद्योगबलमाश्रितः॥ परका पंविरेरा वरीसिद्धेश्चामा
.नक्षत्रभावयेत्॥ पिण्डहि त्वाविरात्प्राणोवायुभूतष्पडं(ब्रवेत्॥ पार्श्वपीड्य
दं प्राणहृदुरः कण्ठमूर्द्धसु॥ आरोप्य ब्रह्मरंध्रेण ब्रह्मनीत्वोत्सृजेत्तनुं॥ विहरिष्यन्सु
राक्रीडे मत्स्यसर्वंविभावयेत्॥ विमानेनोपतिष्ठन्ति सत्वहृत्तिं सुरस्त्रिपः॥ यथासं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्नोति भूतानां च पृथक्पृथक्॥ परमाणुमये चित्तं भूतानामस्मयि रञ्जयेत्॥ कालसूक्ष्मात्मको
योगी लघिमानमवाप्नुयात्॥ धारयन्मय्यहं तत्त्वे मनो वैकारिकेऽखिलं॥ सर्वेन्द्रियाणामा
त्मत्वं प्राप्तिं प्राप्नोति मन्मनाः॥ महत्यात्मनि यः सूत्रे धारयन्मयि मानसे॥ प्राकाम्यं
पारमेष्ठ्यमविन्दते व्यक्तजन्मनः॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्का
लविग्रहे॥ स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचोदनात्॥ नारायणे तुरी
याख्ये भगवच्छब्दशब्दिते॥ मनो मय्यादधद्योगी मद्धर्मा वशितामियात्॥
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः॥ परमानन्दमाप्नोति यत्र कामोऽवसी
यते॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि॥ धारयञ्छ्वेततां याति षडूर्मिर

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तं पः ॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिद्धियेः ॥ प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमी
शिता ॥ ७५ ॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका
मताः ॥ अनूर्मिमत्त्वं देहेस्मिन् दूरश्रवणदर्शनं ॥ मनोजवः कामरूपं परका
य प्रवेशनं ॥ स्वच्छन्द मृत्युर्देवानां सह क्रीडानुदर्शनं ॥ यथा संकल्प संसि
द्धि राज्ञाप्रतिहता गतिः ॥ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता ॥ अग्न्यर्कां
बुविषादीनां प्रतिष्टंभो पराजयः ॥ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः
यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ॥ अणिमान
मवाप्नोति तन्मात्रोपासको मम ॥ महत्यात्मन्मयि परे यथासंस्थं मनो दधत् ॥ महिमानमवा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुस्मितं भावयेन्मुखं॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्॥ तच्च त्यक्त्वा मदारोहो न किं
चिदपि चिन्तयेत्॥ एवं समाहितमतिर्मामेवात्मानमात्मनि॥ विचष्टे मयि सर्वात्मन् ज्योति
र्ज्योतिषि संयुतं॥ ध्या नेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः॥ संयास्यत्याशु निर्वा
त णं द्रव्यज्ञानक्रिया भ्रमः॥ इति श्रीभागवते महा पुराणे एकादशस्क
कु न्धे चतुर्दशोऽध्यायः श्रीभगवानुवाच॥ जितेन्द्रियस्य युक्त स्य जितश्वासस्य योगि
नः॥ मयि धारयत श्चेत उपतिष्ठन्ति सिद्धयः॥ उद्धव उवाच॥ कया धारण
या कास्वित् कथं वा सिद्धिरच्युत॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान्॥ भगवानुवाच॥
सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः॥ तासामष्टौ मत्प्रधाना दशैव गुणहे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मुखिदुमबृपत्रांसकाक्षिं कौ॥ काक्षिकायान्यसेत्स्व थ्यसो माध्वी नुतरोतरं॥ वहिमध्येरमरे
दुपमभैतध्यानमंगलं॥ समंप्रशान्तं सुमुखं दीर्घबाहुं चारुचतुर्भुजं॥ सुचारुसुन्दराङ्गं
वै सुकपोलं रुचिरस्मि तं॥ सुमानकर्णविन्यस्तस्फुरन्मकरकुण्डलं॥ हेमाम्बरंघन
श्यामं श्रीवत्सश्री निकेतनं॥ शंखचक्रगदापद्म वनमालाविभूषितं॥ श
रैर्विलसत्पादं कौस्तुभप्रभयायुतं॥ द्युमत्किरीटकटककटिसूत्राङ्ग
दयुतं॥ सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणं॥ सुकुमारमभिध्यायेत्स
र्वाङ्गेषु मनोदधत्॥ इन्द्रियाणीन्द्रियार्थेभ्यो मनसाकृष्य तन्मनः॥ बुद्ध्या सारथिना धीरः
प्रणयेद्बहि सर्वतः॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्॥ नान्यानि चिन्तयेद्भूय.

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सीदन्खिन्नपेन्मामतुद्रितः॥ नतथास्यभवेत्क्लेशो बन्धस्थान्यप्रसंगतः॥ योषित्संगाद्यथापुं
सो यथा तत्संगिसंगतः॥ उद्धवः॥ यथा त्वामरविन्दाक्ष यादृशं वा यदात्मकं॥ ध्यायेन्मुमु
क्षुरेतन्मे ध्यानं वं — — वक्तुमर्हसि॥ भगवान्॥ सम आसन आसीनस्समका
यथासुखं॥ हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः॥ प्राणस्य
शोधयेन्मार्गं कुंभ पूरकरेचकैः॥ विपर्ययेणापि शनैरभ्यसेन्निर्जिते
न्द्रियः॥ हृद्यविच्छिन्नमोंकारं घण्टानादं बिसोर्णवत्॥ प्राणेनोदीर्य तत्राथ पुनस्सं
वेशयेत्स्वरं॥ एवं प्रणवसंयुक्तं प्राणमेवं समभ्यसेत्॥ दशकृत्वस्त्रिषवणं मासा
दर्वाग्जितानिलः॥ हृत्पुण्डरीकमन्तस्थमूर्ध्वनालमधोमुखं॥ ध्यात्वोर्ध्वमुख

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वाग्गद्गदा द्रवते यस्य चित्तं हसत्यभीक्ष्णं रुदति क्वचिच्च ॥ विलज्ज उद्गायति नृत्य
ते च मद्भक्तियुक्तो भुवनं पुनाति ॥ यथाग्निना हेम मलं जहाति ध्मातं पुनस्स्वं भजते च रू
पं ॥ आत्मा च कर्मानु शयं विधूय मद्भक्तियोगेन भजत्यथो मां ॥ यथा यथात्मा प
रिमृज्यतेसौ मत्पुण्य गाथाश्रवणाभिधानैः ॥ तथा तथा पश्यति वस्तु सूक्ष्मं चक्षु
र्यथैवाञ्जनसंप्रयु क्तं ॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते ॥ मामनुस्मर
तश्चित्तं मय्येव प्रवि लीयते ॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि स
माधत्स्व मनो मद्भावभावितं ॥ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ॥ क्षेमे विविक्त आ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

येयंयद्धि रे (ह)भिः॥ नफिंस वा मय्यनुरक्तचित्तास्थाम्ना महास्रोस्निन जीववस्सलाः॥ कामै रना॥
धीधियोजुपत्तिते नैरपे द्यहिवि दुःसुखम्ममं॥ बाध्यमानोपि मद्भक्तो विषयैरजितेन्द्रियः॥ प्र
हास्त याद्धि मभत्यावि षपैर्नाभिभूयते॥ यथाग्निस्सुसमिद्धार्चिः करोत्यैधांसि भस्मसा
तथा मद्विषयाभ क्तिरुद्धवैनांसि कृत्स्नशः॥ नसा धयति मां धेम्मा न सां
योग ऽद्धवा॥ नखा ध्यायस्तपस्त्यागो यथा भक्तिस्या मोर्जिता॥ भत्म्याहमेक
आह्य श्रद्धयात्मा प्रियस्सतां॥ भक्तिः पुनाति मन्निष्ठा स्वपाकानपि संभवान्॥ धर्मस्स
(१) त्यदयापेतो विद्या वा तपसान्विता॥ मत्तभत्यापेतमात्मानं न सम्यक्प्रपुनाति हि॥ कथं
विना रोमहर्षं द्रुवता चेतसा विना॥ विनानन्दाश्रुकलया शुद्ध्येद्भत्त्या विनाशयः॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यथारुचि॥ धर्म्ममेके यत्रस्थान्ये कामं सत्यं दमं शमं॥ अन्ये वदन्ति चार्थं वै ऐश्वर्यं त्यागं
भोजनं॥ केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान्॥ आद्यन्तवन्त एवैषां लोकाः कर्म्मवि
निर्म्मिताः॥ दुःखोदर्का स्तमोनिष्ठा क्षुद्रानन्दा शुचार्पिताः॥ मय्यर्पितात्मनः सभ्य निर
पेक्षस्य सर्व्वतः॥ म यात्मना सुखं यत्तत्कुतः स्याद्वि षयात्मनां॥ अकिञ्चन
स्य दान्तस्य शान्तस्य स मचेतसः॥ मया सन्तुष्टमनस सर्वाः सुखमया दिशः॥
न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं॥ न योगसिद्धीरपुनर्भवं वा
मय्यर्पितात्मेच्छति मद्विनान्यत्॥ तथा न मे प्रियतम आत्मयोनिर्न शङ्करः॥ न च सङ्कर्षणो न श्रीर्नै
वात्मा च यथा भवान्॥ निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनं॥ अनुव्रजाम्यहं नित्यं पू

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कः॥ निरस्य सर्वतः सङ्गं येन त्वय्याविशेन्मनः॥ भगवान्॥ कालेन नष्टा प्रलये वाणीयं वे
दसंज्ञिता॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः॥ तेन प्रोक्ता च पुत्राय मनवे पूर्व
जाय सा॥ ततो भृग्वादयोगृह्णन्सप्त ब्रह्ममहर्षयः॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदा
नवगुह्यकाः॥ मनुष्यास्सिद्धगन्धर्वास्सविद्याधरचारणाः॥ किन्देवाः किन्न
रा नागा रक्षः किम्पुरुषादयः॥ बह्व्यस्तेषां प्रकृतयो रजस्सत्त्वतमोभुवः॥
याभिर्भूतानि भिद्यन्ते भूतानाम्मतयस्तथा॥ यथाप्रकृति सर्वेषां चित्रा वाचस्स्रवन्ति
हि॥ एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम्॥ पारम्पर्येण केषाञ्चित्पाषण्डमतयो
ऽपरे॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ॥ श्रेयो वदन्त्यनेकान्तं यथाकर्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

करत॥ मयैत द्ग तां वो वि प्रा ग्ड ह्रो यत्सां रप्य पो ग यो:॥ जा नीत मा ग तं य बं यु प्म क्र मीति व दा
या॥ म्र हं यो ग स्य सो रव स्प स त्य स्य तै रय ते ज स:॥ प स प पाँ द्वि ज से ष्ठो: यि य: कीर्ते दं म
स्य च॥ माँ भ जं सि ग्ड णा स्स तैं नि ग्ड णा नि र पे दा कं॥ स्स हृ दं प्रि. य मा भा नं सा
म्बा म्या सँ गा द या ग्ड णा:॥ इति तेकि न स दे हु म्ड न य स्स न का दं य:
स णा वं थि ता प रया भ क्या ग्ट णा न सं स्त वै:॥ तेरहं प्रा जि त स्स म्य व सं स्ता:
मत् मत् म पि भि:॥ प्र ती. या य स्व कन्धी म प स्य त: प र मे ष्ठि न:॥ इति श्री भाग
व ते ए का द शस्क न्धे त्र यो द शो ध्या य:॥ ॐ उ द्ध व:॥ व द न्ति कृ ष्ण श्रे यां सि ब हू नि ब्रह्म वा
दि न:॥ ते षां वि कल्प प्राधा न्य मु ता हो ए व मु ख्य ता॥ भ व तो दा हृ त स्वा मिन् भ क्ति यो गो न पे क्ष

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न स दु त्ता ती क्ष्मा ज्ञा ना सि ना भ ज त मा खि न सै श या चिं॥ ई दे त वि भ्र म मि द म्न न सो सि ला

सि द्द र्ध्दिव न ष म ति नौ न म ला त च कौं॥ षि जा न मे क म्रु रु धौ व बि भा ति मा पा स्व न्नै य था ग्रु ता

छि त्रि सर्वा क्रु तो वि वा प ॥ द्दि त त ः प ति नि बु र्त्य नि ब्रु त ट ष्मा त्स रत्न स्रै॥ भ वे भि ज

त्र र्द्ध स्वा नु भ वे नि रीह ॥ सा ह्र स्य ते बा च य दी द म वे स्त्य बु ध्या त्य तौ श्र मा य न भ

वे ता स्व त्ति सा वि वा ता त॥ दे ह भ्रु न स्व र म व स्थि ता म्रु क्ति त वा सि ह्रो न प स्य

ण ति य तो द्द्य ग म त्स्व रू पं॥ दै वा कु प त म य दै व व शा दे पे तं बा सो य या प रि

क्ष त म्म दि रा म दा ध्य॥ दे हो हि दै व क रा ना ः स्व न्नु क र्म्मि या व त्त स्वा रं भ वां सु ति स्त्री

दा त रा व सा धु ः॥ तां सां प्र पं च म भि रू ढ स मा धि यो ग स्वा नं पु न र्न भ ज ते प्र ति बुद्ध

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवस्साक्षित्वेन विनिश्चितः ॥ यर्हि संसृतिबंधोऽयमात्म
नो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां ॥ अहंकारकृतं बन्धमात्मनोऽर्थवि
पर्ययं ॥ विद्वान्निर्विद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत् ॥ यावन्नानार्थधीः पुंसो न नि
वर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ असत्त्वादात्मनो
न्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ यो
जागरे बहिरनुक्षणधर्मिणोऽर्थान् भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षा
न् ॥ स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ एवं विमृश्य
गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः ॥ संछिद्य हार्दमनुमा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

पद्यत कर्मधीः॥ स मामचिंतयद्देवः प्रश्नपारतितीर्षया॥ तस्याहं हंसरूपेण सकाशमगम
तदा॥ दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनं॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति॥ इत्यहमु
निभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे॥ वस्तुनो यदि
नानात्व आत्मनः प्रश्न ईदृशः॥ कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः॥ पञ्चा
त्मकेषु भूतेषु समानेषु च वस्तुतः॥ को भवानिति वः प्रश्नो वाचारंभो निरर्थकः॥ म
नसा वचसा दृष्ट्या गृह्यतेन्यैरपीन्द्रियैः॥ अहमेव न मत्तोन्यदिति बुध्यध्वमंजसा॥
गुणेष्वाविशते चेतो गुणाश्चेतसि वः प्रजाः॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः॥ गुणेष्वावि
शतेचित्तमभीक्ष्णं गुणसेवया॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत्॥ जाग्रत्स्वप्नसुषु

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भयेहते॥ आगमोपः प्रजादेशः कालः कर्म च जन्म च॥ ध्यानम्मन्त्रोथ
संस्कारो दशैते गुणहेतवः॥ तत्तत्सात्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते॥ निन्दन्ति तामसं यत्तद्राजसं
७ तदुपेक्षितं॥ सात्विकान्येव सेवेत पुमान्सत्वविवृद्धये॥ ततो धर्म्मस्ततो ज्ञानं यावत्स्मृ
त तिरपोहनं॥ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं॥ एवं गुणव्यत्ययजो देह
प स्शाम्यति तत्क्रियः॥ उद्धव॥ विदन्ति मर्त्याः प्रायेण विषयान्पदमापदां॥ तथा
पि भुंजते कृष्ण तत्कथं श्वखराजवत्॥ भगवान्॥ अहमित्यन्यथाबुद्धिः
प्रमत्तस्य यदा हृदि॥ उत्सर्पति रजो घोरं ततो वैकारिकम्मनः॥ रजोयुक्तस्य मनसस्संक
(७) ल्पस्सविकल्पकः॥ ततः कामो गुणध्यानाद्दुस्सहस्स्याद्धि दुर्म्मतेः॥ करोति कामवशगः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ण्यविजितेन्द्रियः॥ दुःखोदर्कान्संपश्यन्रजोवेगविमोहितः॥ रजस्तमोभ्यां यदपि विद्वा
न्विक्षिप्तधीः पुनः॥ अतन्द्रितो मनो युञ्जन्दोषदृष्टिर्न सज्जते॥ अप्रमत्तोनुयुञ्जीत मनो
मय्यर्पयञ्छनैः॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः॥ एतावान्योग आदि
ष्टो मच्छिष्यैस्सनकादिभिः॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा॥ उद्धव उ॥
यदा त्वं सनकादिभ्यो येन रूपेण केशव॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदि
तुं॥ भगवानुवाच॥ पुत्रा हिरण्यगर्भस्य मानसास्सनकादयः॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैका
न्तिकीं गतिं॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितीर्षोः॥
भगवानुवाच॥ एवं पृष्टो महादेवस्स्वयंभूर्भूतभावनः॥ ध्यायमानः प्रश्नबीजं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते॥ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कन्धः पंचरस
प्रसूतिः॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्को द्विफलोर्कं प्रविष्टः॥ अदन्ति चैकं फलमस्य गृध्रा
ग्रामेचरा एकमरण्य वासाः॥ हंसाय एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं
एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीराः॥ प्रवृश्च्य जी
वाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रं॥ ॐ [illegible] एकादशस्कन्धे द्वादशो
ध्यायः॥ ॐ श्रीभगवानुवाच॥ सत्वं रजस्तम इति गुणा बुद्धेर्न्न चात्मनः॥ सत्वेनान्यतमौ ह
न्यात् सत्वं सत्वेन चैव हि॥ सत्वाद्धर्मो भवेद्वृद्धात् पुंसो मद्भक्तिलक्षणः॥ सात्विकोपासया सत्वं
ततो धर्मः प्रवर्त्तते॥ धर्मो रजस्तमो हन्यात् सत्ववृद्धिरनुत्तमः॥ आशु नश्यति तन्मूलो ह्यधर्म उ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मामेवं शरणमात्मानं सर्वदेहिनां॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः॥ उद्धवः॥ संशय
श्शृण्वतो वाचं तव योगेश्वरेश्वर॥ न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः॥ श्रीभगवान्॥ स एष
जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः॥ मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा
स्वरो वर्ण इति स्थविष्ठः॥ यथानिलः खेऽनिलबन्धुरूष्मा बलेन दारुण्यधिमथ्य
मानेऽणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी॥ एवं गदिः कर्म
गतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च॥ संकल्पविज्ञानमथाभिमानः सूत्रं रजस्सत्त्वतमोवि
कारः॥ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः॥ विभक्तशक्तिर्बहुधेव भाति बीजानि
योनिं प्रतिपद्य यद्वत्॥ यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तन्तुवितानसंस्थः॥ स एष सं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म स्तं बा ० मा मु पा ग ता ः॥ के व ल्ले न हि मा वे न गो प्ये गा वो मृ गाः स्व गाः॥ ये न्ये मृ ढ धि यो ना गा सि द्ध

मा मी पु रं ज सा॥ य न्न यो गे न सौ रव्ये न दा न ब त त पो द्व रैः॥ व्या रव्या स्वा ध्या य स न्या सैः प्रा पु या द्य

न्ते ॰ बा न पि॥ रा मे पा सा धं म छ रां प्र णी ते स्वा व त कि ना म य ऌ प ता वि ताः॥ वि मा ई भा वे न

न मे श्वि यो ग स्त्री बा ध यो न्य इ द श्र स्तु स्वा य॥ पा सौ क्ष पाः प्रेष्ठ त मे न नी ता म यै व वृ द्धा

व न गो य रे स॥ क्षणा र्द्ध व तोः पु न रं ग ता सौ ही न म्म या का त्स प स मा ब भू वुः॥ ता ना वि द

म्म य्य नु षं ग बं न्ध धि य स्व मा त्मा न म द स्तु ये दं॥ य था स मा धौ मु न यो ब्धि तो ये न द्यः प्र विष्टा

इ व ॰ ना म ज्ञ पे॥ म त्त का मा र म णं जा र म्म त्स्व रू पा वि दो ब लाः॥ ब्र ह्म मी प र मं प्रा पु सं गा क ता स ह

स्र शः॥ त स्मा त्व मु द्ध वो त्सृ ज्य चो द नां प्र ति चो द नां॥ प्र वृ त्तं च नि वृ त्तं च श्रो त व्य श्रु त मे व च॥ म मे

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ंगुह्यं स्वात्मनो यदुकुनन्दन ॥ सुगोप्यमपि वक्ष्यामि त्वम्मे भृत्यस्सुहृत्सखा ॥ ॐ इति श्रीभागवते एकाद
शस्कन्धे एकादशोध्यायः ॥ श्रीभगवान् ॥ न रोधयति मां योगो न सांख्यं धर्म एव च ॥ न स्वाध्यायस्तपस्त्यागो
नेष्टापूर्तं न दक्षिणा ॥ व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ॥ यथावरुन्धे सत्सङ्गः सर्वसङ्गा
ल पहो हि माम् ॥ सत्सङ्गेन दैतेया यातुधाना मृगाः खगाः ॥ गन्धर्वाप्सरसो नागास्सिद्धा
ठ श्चारणगुह्यकाः ॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोन्त्यजाः ॥ रजस्तमःप्रकृतयस्त
स्मिंस्तस्मिन्युगेनघ ॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो
मयश्चाथ विभीषणः ॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गो
प्यो यज्ञपत्न्यस्तथापरे ॥ तेनाधीतश्रुतिगणा नोपासीतमहत्तमाः ॥ अव्रतातप्ततपसो

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुंज्यान्निवेदितं॥ यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः॥ तत्तन्निवेदयेन्मह्यं तदानंत्याय क
ल्पते॥ सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं॥ भूरात्मा सर्वभूतानि भद्र पूजापदानि मे॥ सूर्ये
तु विद्यया त्रय्या हवि षाग्नौ यजेत मां॥ आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना॥ वैष्णवे
बंधुसत्कृत्या हृदि खे ध्याननिष्ठया॥ वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः
स्थंडिले मंत्रहृदयै र्भोगैरात्मानमात्मनि॥ क्षेत्रज्ञं सर्व भूतेषु समत्वेन यजेत
मां॥ धिष्ण्येष्वेतेषु मद्रू पं शंखचक्रगदांबुजैः॥ युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः
इष्टापूर्तेन मामेवं यो यजेत समाहितः॥ लभते मयि सद्भक्तिं मत्स्मृतिं साधुसेवया॥ प्रायेण
भक्तियोगेन सत्संगेन विनोद्धव॥ नोपायो विद्यते सम्यक् प्रायेण हि सतामहं॥ अथैतत्पर

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तात्वाशात्वाच्च येषां मां यावद्द्वा स्वात्मया ह्दराः ॥ भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ म
ल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं ॥ परिचर्या स्तुतिप्रह्वगुणकर्मानुकीर्तनं ॥ मत्क
थाश्रवणे श्रद्धा मदनुध्यानमुद्धव ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं ॥
मज्जन्मकर्मकथनं मम पर्वानुमोदनं ॥ गीततान्डववादित्रगोष्ठीभिर्मद्गृहो
त्सवः ॥ यात्राबलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तान्त्रिकी दीक्षा
मदीयव्रतधारणं ॥ ममार्चास्थापने श्रद्धा स्वतः संहत्य वोद्यमः ॥ उद्यानोपवनाक्रीडपु
रमन्दिरकर्मणि ॥ सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः ॥ गृहशुश्रूषणं मह्यं दास
वद्यदमायया ॥ अमानित्वमदम्भित्वं कृतस्यापरिकीर्तनं ॥ अपि दीपावलोकम्मे नोप

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नां भित्तिश्च प्रच्छद वसनान्तन्मे ।। संसर्गनलक्ष्य पाभक्त्या मयि समापयतु पायितः ।। स वै मे दर्शितं सद्भि रञ्
सारिन्दते पदं ।। उद्धवः ।। साधूत्तमश्लोक मनः कीदृग्विधं प्रभो ।। भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भि
रादृता ।। एतन्मे पुरुषप व्याब्रूप पन्नाय वक्तव्यं तां ।। त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः
अवतीर्णोसि भगवान् स्वेच्छोपात्तपृथग्वपुः ।। भगवानुवाच ।। कृपा लुरकृतद्रोहस्तितिक्षु
सर्वदेहिनां ।। सत्यसारोनवद्यात्मा समस्सर्वोपकारकः ।। कामैरहतधी
र्दान्तो मृदुश्शुचिरकिंचनः ।। अनीहो मितभुक्छान्तः स्थिरो मच्छरणो मुनिः ।। अ
प्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ।। अमानी मानदः कल्यो मैत्रः कारुणिकः कविः
आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् ।। धर्मान्सन्त्यज्य यस्सर्वान्मां भजेत स च सत्तमः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साधु साधु वा ॥ आत्मारामोनया वृत्त्या विचरेज्जडवन्मुनिः ॥ श
ब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि ॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ गां दुग्धदोहा
मसतीं च भार्यां देहं प राधीनमसत्प्रजां च ॥ वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्ष
ल ति दुःखदुःखी ॥ यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवप्राण निरोधमस्य ॥ लीलावता
क्र रेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥ एवं जिज्ञास यापोह्य नानात्वभ्रममात्मनि ॥
उपारमेत विरजं म नो मय्यर्प्य सर्वगे ॥ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ॥ मयि
७ सर्वाणि कर्माणि निरपेक्षः समाचर ॥ श्रद्धालुर्मत्कथाः शृण्वन् सुभद्रा लोकपावनीः ॥ गायन्न
नुस्मरन् कर्म जन्म चाभिनयन्मुहुः ॥ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्च

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

था॥ इन्द्रि यैरि न्द्रि यार्थे षु ण तो र पिण तो षु च॥ ब्रह्म मा णो ष हं क र्यो अपि द्वान्यः स्तु विक्रि य॥ः॥ दे
वा धी ने ता री रे स्मि न्न ण ता भा यो न कर्म्म णा॥ व र्त मा नो बु ध स्त त्र क तीठ भिन्तिब्रम न्ये तो॥ ध्य तै॥ एवं
वि र ता स्था य न श्री स ना ट न म ज ने॥ द री न स्य स्री न ज्ञा ण मो ज न स्त च ण दि षु॥ नत्त
या व ध्य ते वि द्वां स्तत्त्वत चा द दा त ण णा॥ प्र कृति स्थो प्य सं त तो य पा खं स वि ता नि ल
ः॥ वै रा र द्वे क्ष या सं ग शि त या कि ञ सं श य॥ प्रति बुद्ध इ व स्व म ज्ञा नी स्वा भि नि
व र्ति तो॥ य स्य स्यु वीत सं कल्प्या॥ प्रा णो न्द्रि य म नो धि यां॥ वृत्त य स्त तु नि र्मु तो देह स्थो पि
हि त त ण णो॥ यस्या न्नाहं स्प ते हि रे यं न किं चि ध द्द क या॥ अ श्री ते बा वा चि तं ज न व्य ति की व तैं
बु ध॥ न स्त वीत न मि द्वे त कु र्व त सा ध्व सा धु वा॥ त द तो ण णा द्वो षा भ्यां वर्जि त स्स म द्द मु निः॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ङ ता इति श्चा रव्या ङ ए तो मे न क स्त तः॥ ङ ए स्य मा या मू ल त्वा न्न मे मो दो न ब न्य र्ग॥ रो वा मो ठो रङ खदु
ख दै ठा पति स्व मा य या॥ स्व प्ने य यात्म नः रव्याति सी स्टति र्नु तु वा स्त वी॥ वि धावि द्वे म म त नू वि ह्य द्व व
दा री रि ए॥ मो स वं न्थ क री श्रा द्वे मा य या मे वि र्नि र्मि ते॥ ए क स्ये व म मा रा रय जी व स्ये व म
ठा म ते॥ ब न्धो स्मा वि द्य या नादि र्दि द्या या व त थे त रः॥ न्य प व न्ध स्य मु ता स्य वे न द
ए वं ब दा भि ते॥ वि रु द्ध धा र्मि ए सा त स्थि त यो रे क धा र्मि णा रु प णी वे तौ स द र शा
रवा यौ य इ क या का त नी डौ च ह दो॥ ए क स्त यो रवा द ति पि प्प ला न्न म न्यो जि र ज्ञो पि
ब लो न क्ष या व॥ श्रा त्मा न म न्यं च स वे दृ वि द्वा न्न न पि प्प ला दो न ठ न तु पि प्प ला दः यो वि द्व या यु
रा ठ नि त्य ब द्धो वि द्या म न्यो य सा ठ नि त्य मु क्तः दे ह स्थो पि न दे ह स्थः क्ष म ति रव प्न इ व्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गुणस्रजे जनि कर्मणि गुणान्नु सृजते गुणान् ॥

ज्ञीकन्त गुणसंख्यातो भुंक्ते कर्मफलान्यसौ ॥ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ॥ नानात्व

मात्मनो यावत्पारतन्त्र्यं तदैव हि ॥ यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयं ॥ य एतत्

समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ काल आत्मागमो लोकः स्वभावो धर्म एव च ॥ इति मां ब

हुधा प्राहुर्गुणव्यतिकरे सति ॥ उद्धवः ॥ गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः ॥

गुणैर्न बध्यते देही बध्यते वा कथं विभो ॥ कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं

भुञ्जीतोत विसृजेच्छयीतासीत याति वा ॥ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर ॥ नित्यमुक्तो नि

त्यबद्ध एकमेवेति मे भ्रमः ॥ इति श्रीभागवते एकादशस्कन्धे दशमोऽध्यायः ॥ श्रीभगवान् ॥ बद्धो

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तैः स्थानैर्यागक्रन्तितः कृणः॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः॥ भुञ्जीत देववत्तत्र भोगा
न्दिव्यान्निजार्जितान्॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते॥ गन्धर्वैर्विहरन्मध्ये देवानां हृद्यवे
षधृक्॥ स्त्रीभिः काम्यग यानेन किङ्किणीजालमालिना॥ क्रीडन्न वेदात्मपातं सुराक्रीडेषु नि
र्वृतः॥ तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते॥ क्षीणपु ण्यः पतत्यर्वागनिच्छन्
कालचालितः॥ यद्यधर्म रतः सङ्गादसतां वाजितेन्द्रियः॥ कामा त्मा कृपणो लुब्धः स्त्रैणो भू
तविहिंसकः॥ पशून विधिनालभ्य प्रेतभूतगणान्यजन्॥ नरकानवशो जन्तुर्गत्वा यात्युल्ब
णं तमः॥ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः॥ देहमाभजते तत्र किं सुखं मर्त्यधर्मि
णः॥ लोकानां लोकपालानां मत्तो भयं कल्पजीविनां॥ ब्रह्मणोपि भयं मत्तो द्विपरार्धपरायुषः॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हौ स्मृति वीयथा॥ तत्तदाकृतिभेदेन जायते भिद्यते च धीः॥ एवमप्यंग सर्वेषां देहिनां देहह
योगतः॥ कालावयवतः संति भावा जन्मादयोऽसकृत्॥ तत्रापि कर्मिणां कार्हं रखातं त्र्यंबलन
द्यते॥ नौ तुःखदुःख सुखयोः को न्वर्थो विवर्तं भजेत्॥ न देहिनां सुखं किंचिद्विद्वि
द्यते विदुषामपि॥ तथाच दुःखं मूढानां वृथाहंकारिणां परं॥ यदि प्राप्तिं विघातं
च जानन्ति सुखदुःखयोः॥ कस्मात्ते दुःखराहितं सुखं न प्राप्नुयुस्सदा॥ तेप्यद्धान
त्रिदुःपैगम्मृत्युर्भग्रभवद्यपायः॥ को न्वर्थः सुखयत्येनं कामो वा मृत्युरंतिके॥ आ
घ्रातं नीयमानस्य वध्यस्येव न तुष्टिदः॥ श्रुतं च दृष्टवदुष्टं स्पर्धासूयात्ययाव्ययैः॥ बहुत
रायबामत्वात् कृषिवत्सोपि निष्फलः॥ अन्तरायैरविहतो यदि धर्मः स्वनुष्ठितः॥ तेनापि निर्जि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नात्मस्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः॥ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृ
तान्गुणान्॥ अन्तःप्रविष्ट आधत्त एवं देहगुणान्परः॥ योसौ गुणैर्विरचितो देहोयंपु
रुषस्य हि॥ संसार स्तन्निबन्धोयं पुंसो विद्याच्छिदात्मनः॥ तस्माज्जिज्ञासयात्मानं
ल मात्मस्थं केवलं प र॥ संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं॥ आचार्यो
व रणिराद्यः स्यादन्ते वास्युत्तरारणिः॥ तत्सन्धानं प्रवचनं विद्यासन्धिस्सुखा
वहः॥ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां॥ गुणांश्च
संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः॥ अथैषां कर्मकर्तॄणां भोक्तॄणां
सुखदुःखयोः॥ नानात्वमथ नित्यत्वं लोककालागमात्मनां॥ मन्यसे सर्वभावानां संस्था

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कोमयं॥ पुंसो युक्तस्य नानात्वीभ्रमस्सगुणदोषकृत्॥ कर्माकर्मविकर्मेति गुणदोषधियोर्भिदा॥
तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत्॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे॥ ज्ञा
नविज्ञानसंयुक्त आत्मभूतश्शरीरिणाम्॥ आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यते॥
दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते॥ गुणबुद्ध्या च विहितं न करोति य
थार्भकः॥ सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः॥ पश्यन्मदात्मकं विश्वं
विपद्येत वै पुनः॥ इत्युक्तः॥ इत्यादिष्टो भगवता महाभागवतो नृप॥ उद्धवः प्रणि
पत्याह तत्त्वजिज्ञासुरच्युतं॥ उद्धवः॥ योगेश योगविन्यास योगात्मन् योगसंभव॥ निश्श्रेयसाय मे प्रो
क्तस्त्यागस्सन्न्यासलक्षणः॥ त्यागोयं दुष्करो भूमन् कामानां विषयात्मभिः॥ सुतरां त्वयि सर्वात्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रवेश्य त्यक्तुद्धवं समभाषत ॥ इति सीभागवते एकादशस्कन्धे षष्ठोध्यायः ॥ भगवानुवाच ॥
यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकाङ्क्षिणः ॥ मया निष्पा
दितं ह्यत्र देवकार्य मशेषतः ॥ यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः ॥ कुलं वै
शापनिर्दग्धं नङ्क्ष्य त्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येनां पुरीं च प्लावयि
ष्यति ॥ यर्ह्येवायं मया त्यक्तो लोकोयं नष्टमङ्गलः ॥ भविष्य त्यचिरात्साधो कलिनापि
निराकृतः ॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोधर्मरुचिर्भद्र भविष्यति
कलौ युगे ॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु ॥ मय्यावेश्य मनः सम्यक्समदृग्विच
रस्व गां ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोम

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तास्समचितेतवझ्रवत्तृ॥ ङ इतिं एकादशस्कंधे नवमोध्यायः ॥ श्रीभगवानुवाच ॥ मयोदितेष्ववहित
स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत् ॥ अन्वीक्षेत विशुद्धात्मा देहिनां
विषयात्मनां ॥ २ ॥ गुणेषु तत्वध्यानेन सर्वारंभविपर्ययं ॥ सुप्तस्य विषयालोकंध्यायतोवा
मनोरथः ॥ नानात्मकत्वा द्विफलस्तथाभेदात्मधीर्गुणैः ॥ निवृत्तं कर्मसेवेतप्रवृत्तं मत्पर
परस्त्यजेत् ॥ जिज्ञासायां संप्रवृत्तो नाद्रियेत कर्मचोदनां ॥ य मानभीक्ष्णं सेवेत नियम
मान्मत्परः क्वचित् ॥ मद भिज्ञं गुरुं शान्तमुपासीत मदात्मकं ॥ अमान्यमत्सरो दक्षो निर्मम
मोदृढसौहृदः ॥ असत्वरोर्थजिज्ञासुरनसूयुरमोघवाक् ॥ जायापत्यगृहक्षेत्रस्वजनद्रविं
णादिषु ॥ उदासीनस्समं पश्येत्सर्वेष्वर्थमिवात्मनः ॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्युसपत्नइवगेहपर्तिलुनति॥ स्टश्चपुराणिविविधान्यजयात्मराक्ष्याद्दोन्वसरीस्टपपद
न्नसवर्न्दराम‌त्स्यान्वनैस्तैरतुषृहृदयःपुरुषंविधायब्रह्मावलोकधिषणाम्मुदमापदेवः॥ नक्षार
द्दर्भामिदंबह्वसं भवांतोमानुष्यमर्थदमनित्यमपीहधीरः॥ तूर्णंयतेतनं
पतेदनुमृत्युपा वक्षिसेपसापविषयःखलुजन्म तस्यात्॥ एवंसंजातवैरा
ल बेयाविज्ञाना नोकध्या ग्यवि॥ विचराभिमहीमेताम्मुक्तसं गोनहंकृतिः॥ नह्येकस्मा
न्नगुरो ज्ञानंसुस्थिरंस्यात्सुपुष्कलं॥ ब्रह्मैतदद्वितीयंवैगीयते बहुधर्षिभिः॥
७ श्रीभगवानुवाच॥ इत्युक्त्वासयदुंविप्रस्तमामंत्र्यगंभीरधीरधीः॥ वंदितोभ्यर्चितोराजाय
यौप्रीतोयथागतं॥ अवधूतवचश्श्रुत्वापूर्वेषान्नसपूर्वजः॥ सर्वसंगविनि

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पत्रः यत्र मणो देही धारयेत्स कलौ धिया॥ स्नेहाद्वेषाद्भयाद्वापि यातित तत्स्वरूपतां॥ कीटः पेशा
स्कृतं ध्यायन् कुड्यां तेन प्रवेशितः॥ यातित त्साम्यतां राजन् पूर्वरूपं नु सोऽप्यजन॥ एवं
गुरुरप्यात्तेऽप्य एषा मेरितश्चितामतिः॥ स्वात्मोपरिश्चितौ बुद्धिः स्वरूपमेवदत्तः प्रभो॥
देहो गुरुर्मम — वि रक्तिविवेकहेतुर्विभ्रत स्वसत्वनि धनं सततं स्थुद्रक्षुः॥ त
त्वान्येन विक्ष शाभिपथातेयापि पारत्र्यभित्यव सितोविचरम्यसंगः
जापामजात्यीपत्तुहे त्यक्त्वाहाप्रवगीरपुक्षातिपतरप्रियपिकीर्षपावितद्धत॥ स्वा
तोस्तुकाकमव रुद्ध धनत्स देहस्य बह्वास्य बीजमवसीदति हृदन्धर्म्मा जिह्रे कतीमुमपकर्ष
तिनाहिं तबैरिखोन्यतस्वगड्द रंसवणां कुतश्चित॥ ब्राणोन्यतस्यपलदृक्च कर्म रातिःर्व

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मुनिरेकोल्पभाषणः॥ गृहारम्भो हि दुःखाय विफलश्चाध्रुवात्मनः॥ सर्पः परकृतं वेश्म
प्रविश्य सुखमेधते॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया॥ संहृत्य कालकलया क-
ल्पान्त इदमीश्वरः॥ एक एवाद्वितीयोभूदात्माधारोखिलाश्रयः॥ कालेनात्मानुभावेन
साम्यं नीतासु शक्तिषु॥ सत्वादिष्वादिपुरुषः प्रधान पुरुषेश्वरः॥ परावरा-
णां परमश्चास्ते कैवल्यसंज्ञितः॥ केवलानुभवानन्दसन्दोहो निरुपाधिकः॥
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां॥ संक्षोभयन् सृजत्यादौ तया सूत्रमरिन्द-
म॥ तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखं॥ यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान्॥
यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः॥ तया विहृत्य भूयस्तां ग्रसत्येव महेश्वरः॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्रह्मैवेति मे मतिः॥ सोऽहम्मामहमिति ब्रह्मैव मति
र्विणाशेऽब्रह्मण्यप्याविरचितात्मणि सानुबन्धो॥ तत्त्वमसानिगदितं भवताययाहं संसाध्याया
मि भगवन्ननुशाधि शिष्यं॥ सत्यस्यते स्वहृदात्मन आत्मनोऽन्यं वक्तारमीशविबुधोप्यपि
नानुचक्षे॥ सर्वैर्विमोहितधियस्तव मायये ह शब्दादयश्चानुभूतो बहिरर्थमा
त्राः॥ तस्मात् भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमखण्डविकु
ण्ठधिष्ण्यं॥ निर्विण्णधीरहमिह वृजिनाभितप्तो नारायणं नरस
खं शरणं प्रपद्ये॥ श्रीभगवानुवाच॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः॥ समुद्ध
रन्ति ह्यात्मनात्मानमात्मनैवाशुभाशयात्॥ आत्मनो गुरुरात्मैव पुरुषस्य विशे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पतः॥ परप्रसादानुमानाभ्यां श्रेयोसावनुविन्दते॥ पुरुषत्वे च मान्धीरास्सांख्ययोगविशारदाः॥
माविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितं॥ एकद्वित्रिचतुष्पादो बहुपादस्तथापदः॥ बह्व्यस्स
न्ति पुरस्सृष्टास्तासां मे पौरुषी प्रिया॥ अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरं॥ गृ
ह्यमाणैर्गुणैर्लिङ्गै रग्राह्यमनुमानतः॥ अत्राप्युदाहरन्तीममितिहासं
पुरातनं॥ अवधू तस्य संवादं यदोरमिततेजसः॥ अवधूतं द्विजं कंचि
च्चरन्तमकुतोभयं॥ कविं निरीक्ष्य निपुणं यदुः पप्रच्छ धर्मवित्॥ कुतो बुद्धिरि
यं ब्रह्मन्नकर्तुस्सुविशारदा॥ यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत्॥ प्रायो धर्मार्थका
मेषु विवित्सायां च मानवाः॥ हेतुनैव समीहन्ते आयुषो यशसः श्रि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

यः॥ वक्तुं कल्यः कविरिन्दुस्सुभगो मितभाषणः॥ न वक्तुर्मीठ सेकिंचिज्जडोन्मत्त
पिशाचवत्॥ अग्नेर्बुध द्युमाजेषु कामनो भद्वाग्मिना॥ न तप्यसेग्निना मुक्तो गंगांभस्थइ तद्दिपः॥
प तहिनः पङ्क्तांबु ह्म ज्ञात्मक्यानं द्वकारणं॥ ब्रूहि स्पर्शविहीनस्य भवतः केव
लामनः॥ भगवान्॥ यदुनैव महाभागो ब्रह्मण्येन महात्मना॥ पृष्टस्स भाजितः
प्राह प्रश्रयावनतं द्विजः॥ ब्राह्मणः॥ सन्ति मे बहवो रा जन्गुरवो बुद्ध्युपाश्रिताः
यतो बुद्धिमुपादाय मुक्तोटामीह तान्छृणु॥ पृथिवी वायुराकाशमापोग्निश्चन्द्रमारविः
नापोतोजगरस्सिन्धुः पतंगो मधुकृद्गजः॥ मधुहा हरिणो मीनः पिंगला कुररोर्भकः॥ कुमा
री शरकृत्सर्प ऊर्णनाभिस्सुपेशकृत्॥ एते मे गुरवो राजं चतुर्विंशतिराश्रिताः॥ शि

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दा इति भिरते पामव्लरिदाभिहाम नः॥ यत्तो पदनुरिद्याभि यथा वानाद्रु षाम ज॥ तत
प्या पुरुष व्याघ्रनि बोध कथ याभि ते॥ क्षते राक म्यमा णोपिधी रोदैकव शानुगे॥ तद्वि द्वा
न्नु च लेम्मा गीदनुरि | क्षत्रद्विते र्वतं॥ राखत्र परास्थं स वेंहः परास्थे कान्त संभवः॥
साधुरिस्रा दोत वैक्षमे | र नुरि क्षन्त्र बतान्त रं॥ प्राणवृत्यै | वे सन्तुष्येन्मुनि र्नै वे
द्रि यप्रियैः॥ ज्ञानं य | पान नश्येत नाव कीर्येत वापुन | ॥ विषये ष्वाविशन् यो
गी नाना धर्मेषु स | र्वतः॥ गुणदोब्रव्यपेतात्मा न विषज्येत वायुवत्॥ पार्थिवे
ष्वपि देहेषु प्रविष्टस्तद्गुणाश्रयः॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृ
क्॥ अन्तर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन॥ व्याप्त्याव्यवच्छेदमसंग—

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मात्मनो मुनिर्नभस्त्वं विततस्य भावयेत्॥ तेजोंबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः। नस्पृश्य
ते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान्॥ स्वच्छः प्रकृतितः स्निग्धो मधुरस्तीर्थभूर्नृणां॥ मुनिः
पुनात्यपां मित्रमी क्षोपस्पर्शकीर्तनैः॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभा
जनः॥ सर्वभक्षो ऽपि युक्तात्मा नादत्ते मलमग्निवत्॥ क्वचिच्छन्नः क्वचित्स्प
ष्ट उपास्यः श्रेय इच्छ तां॥ भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभं॥ स्वमाय
या सृष्टमिदं सदस ल्लक्षणं विभुः॥ प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि॥
कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषां॥
विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः॥ कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सा॥ गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः॥ बुद्धिं सं
स्थे न भेदेन व्यत्यस्त इव तत्र गतः॥ लक्ष्यते स्थूलमतिभिरात्मा—चावस्थितोर्क्कवत्॥ नाति
स्नेहः प्रसंगो वा कर्त व्यः क्वापि—केनचित्॥ कुर्वन्विन्देत सन्तापं कपोत इव दीन
५५ राजसी ।। ३१ ।। अधर्मं धर्ममिति या मन्यते तमसावृता ।। सर्वार्थान्वि
परीतांश्च बुद्धिः सा पार्थ तामसी ।। ३२ ।। धृत्या यया धारयते मनःप्राणें
द्रियक्रियाः ।। योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ।। ३३ ।। यया तु धर्म
कामार्थान्धृत्या धारयतेर्जुन ।। प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ।। ३४ ।।

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संगरहितमरागद्वेषतः कृतं। अफलप्रेप्सुना कर्म्म यत्तत्सात्विकमुच्यते॥२३॥ यत्तु
कामेप्सुना कर्म्म साहंकारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतं॥
२४॥ अनुबंधं क्ष यं हिंसामनवेक्ष्य च पौरुषं। मोहादारभ्यते कर्म्म तत्ताम
समुदाहृतं॥२५॥ मुक्तसंगोनहंवादी धृत्युत्साह समन्वितः। सिद्ध्यसि
द्ध्योर्न्निर्विकारः कर्त्ता सात्विक उच्यते॥२६॥ रागी कर्म्मफलप्रेप्सुर्लुब्धो हिं
सात्मकोऽशुचिः हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः॥२७॥ अयुक्तः प्राकृतः स्त
ब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते॥२८॥ बुद्धेर्भेदं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स
इमांल्लोकान्न हन्ति न निबध्यते ॥१७॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म
कर्तेति त्रिविधः कर्मसंग्रहः ॥१८॥ ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते
५० गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥ सर्वभूतेषु येनैकं भावमव्य
यमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं ॥२०॥ पृथक्त्वेन तु य
ज्ज्ञानं नानाभावान्पृथग्विधान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं ॥२१॥ यत्तु कृत्स्नव
देकस्मिन्कार्ये सक्तमहेतुकं ॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं ॥२२॥ नियतं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्व समाविष्टो मेधावी छिन्नसंशयः ॥१०॥ न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः ।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥ अनिष्टमिष्टं मिश्रं च त्रिविधं क
र्म्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥१२॥ पंचैतानि
महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व
कर्म्मणां ॥१३॥ अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं ॥ विविधाश्च पृ
थक्चेष्टा दैवं चैवात्र पंचमं ॥१४॥ शरीरवाङ्मनोभिर्यत्कर्म्म प्रारभते नरः ॥ न्याय्यं वा वि
परीतं वा पंचैते तस्य हेतवः ॥१५॥ तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः ॥ पश्यत्यकृत

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४॥ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्॥ यज्ञो दानं तपश्चैव पावनानि मनीषि
णां॥५॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च॥ कर्तव्यानीति मे पार्थ नि
श्चितं मतमुत्तमं॥६॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते॥ मोहा
५२ त्तस्य परित्यागस्तामसः परिकीर्तितः॥७॥ दुःखमित्येव यत्क
र्म कायक्लेशभयात्त्यजेत्॥ स कृत्वा राजसं त्यागं नैव त्यागफलं ल
भेत्॥८॥ कार्यमित्येव यत्कर्म नियतं क्रियतेर्जुन॥ संगं त्यक्त्वा फलं चैव स त्या
गः सात्विको मतः॥९॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते॥ त्यागी स

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभा
गयोगो नाम सप्तदशोऽध्यायः ॥ अर्जुन उवाच ॥ संन्यासस्य महाबाहो तत्त्वमिच्छा
मि वेदितुं ॥ त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥ श्रीभग
वानुवाच ॥ काम्यानां कर्म्मणां न्यासं संन्यासं कवयो विदुः ॥ सर्व्वकर्म्म
फलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥ त्याज्यं दोषवदित्येके कर्म्म
प्राहुर्म्मनीषिणः ॥ यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे ॥ ३ ॥ निश्चयं शृ
णु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्त्तितः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
२३ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः॥ प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवा
दिनां॥२४॥ तदित्य नभिसंधाय फलं यज्ञतपःक्रियाः॥ दानक्रियाश्च विवि
५२ धाः क्रियन्ते मोक्ष काङ्क्षिभिः॥२५॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्य
ते॥ प्रशस्ते कर्मणि त था सच्छब्दः पार्थ युज्यते॥२६॥ यज्ञे तपसि दाने च स्थि
तिः सदिति चोच्यते॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥२७॥ अश्रद्धया हुतं द
त्तं तपस्तप्तं कृतं च यत्॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥२८॥ इति श्रीम

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततां तपस्तत्रिविधं व्रतैः॥ अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते॥१७॥ सत्कारमा
नपूजार्थं तपो दंभेन चैव यत॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं॥१८
मूढग्राहेणात्म नो यत्पीडया क्रियते तपः॥ परस्योत्सादनार्थं वा त
त्तामसमुदाहृ तं॥१९॥ दातव्यमिति यद्दानं दी यतेनुपकारिणे॥
देशे काले च पा त्रे च तद्दानं सात्विकं स्मृतं॥२०॥ ॥यत्तु प्रत्युपकारा
र्थं फलमुद्दिश्य वा पुनः॥ दीयते च परिक्लिष्टं तद्राजसमुदाहृतं॥२१॥ अदेश
काले यद्दानमपात्रेभ्यश्च दीयते॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतं॥२२

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यष्टव्यमेवेति मनःसमाधाय स सात्विकः ॥११॥ अभिसंधाय तु फलं दंभार्थमपि
चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥१२॥ विधिहीनमसृष्टान्नं मंत्र
हीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥ देवद्विज
५१ गुरुप्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उ
च्यते ॥१४॥ अनुद्वेगकरं वाक्यं सत्यंप्रियहितं च यत् ॥ स्वाध्याया
भ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥ मनःप्रसादः सौम्यत्वं मौनमा
त्मविनिग्रहः ॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥ श्रद्धया परया

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तप्यन्ते येतपोजनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥५॥ कर्शयन्तः शरीरस्थं
भूतग्राममचेतसः ॥ मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥ आहारस्त्वपि सर्व
स्य त्रिविधो भवति प्रि यः ॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥ आयुःसत्वबला
रोग्यसुखप्रीतिविव र्द्धनाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या आ हाराः सात्विकप्रियाः ॥ क
ट्वम्ललवणात्यु ष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्ये
ष्टा दुःखशोकामयप्रदाः ॥८॥ यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छि
ष्टमपि चामेध्यं भोजनं तामसप्रियं ॥१०॥ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्म कर्तुमिहार्हसि ॥२५॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः ॥ अर्जुन उवाच ॥
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ॥ तेषां निष्ठा तु का कृष्ण सत्त्वमाहो
५० रजस्तमः ॥१॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ॥
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥ सत्त्वानुरूपा सर्वस्य श्र
द्धा भवति भारत ॥ श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥ यजन्ते सात्त्विका देवान्य
क्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥४॥ अशास्त्रविहितं घोरं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान्॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव
योनिषु॥१९॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि॥ मामप्राप्यैव कौन्तेय
ततो यात्यधमां गतिं॥२०॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः॥ का
मः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥२१॥ एतैर्विमुक्तः कौन्तेय
तमोद्वारैस्त्रिभिर्नरः॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं॥
२२॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः॥ न स सिद्धिमवाप्नोति न सुखं न प
रां गतिं॥२३॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं क

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इदमद्य मया लब्धमि प्राप्स्ये मनोरथं ।। इदमस्तीदमपि मे भविष्यति पुनर्द्धनं ।।
१३।। असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सिद्धोहं बलवा
सुखी ।।१४।। आ ढ्योभिजनवानस्मि कोन्योस्ति स दृशो मया ।। यक्ष्ये दास्या
मि मोदिष्य इत्य ज्ञानविमोहिताः ।।१५।। अने कचित्तविभ्रान्ता मो
हजालसमावृता ः ।। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।।१६।।
आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।। यजन्ते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ।।१७।।
अहंकारं बलं दर्प्पं कामं क्रोधं च संश्रिताः ।। मामात्मपरदेहेषु प्रद्विषन्तोभ्यसूयकाः ।।

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वीसंपद्विमोक्षाय निबन्धायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५ ॥ द्वौ भूत
सर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥ प्रवृत्तिं च
निवृत्तिं च जना न वि दुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥ अपरस्प रसंभूतं किमन्यत्काम
हैतुकं ॥ ८ ॥ एतां दृष्टि मवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभ वन्त्युग्रकर्माणः क्षयाय
जगतोऽहिताः ॥ ९ ॥ काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहा
न्प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥ चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ॥ कामोपभोगपरमा एतावदिति
निश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाः काम क्रोधपरायणाः ॥ ईहन्ते कामभोगार्थमन्यायेनार्थसंचया ॥ १२ ॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वभावेन भारत ॥१९॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च
भारत ॥२०॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥ श्रीभगवानुवाच ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयो
गव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं ॥१॥ अहिंसा सत्यम-
क्रोधस्त्यागः शान्तिरपैशुनं ॥ दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं ॥
२॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवन्ति संपदं दैवीमभिजातस्य भारत ॥
३॥ दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥४॥ दै

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥ प्राणापान
समायुक्तः पचाम्यन्नं चतुर्विधं ॥१४॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं
च ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं ॥१५॥ द्वाविमौ पुरु
षौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्य
ते ॥१६॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः १७॥ यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ॥ अतोस्मिल्लोके वे
दे च प्रथितः पुरुषोत्तमः ॥१८॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमं ॥ स सर्वविद्भजति मां

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यं तत् ॥५॥ न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्तन्ते तद्धाम परमम्म
म ॥६॥ ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति
॥७॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गन्धानिवा
१०९ शयात् ॥८॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं
विषयानुपसेवते ॥९॥ उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितं । विमूढा
नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥ यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितं । यत
न्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्च
न्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ॥१२॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ॥ पुष्णामि चौ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यो[illegible] श्याहा स्वा गुं न सं वा दे गुणात्रयविभाग[illegible] चतुदशोध्या[illegible] श्रीभगवानुवा
[illegible] मूलमधःशाखमस्त्थं प्राहुरव्ययं ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥
[illegible] ध्वं प्रसृतास्त स्य शाखा गु[illegible] प्रवृद्धा विषयप्रवालाः ॥ अधश्च मूलान्यनु
त[illegible]नि वा र्मानुबं धीनि [illegible] मनुष्य लोके ॥ [illegible] न रूपमस्
ह त[illegible] पलभ्यते ना न्तो न चादिर्न च संप्रतिष्ठा ॥ अश्वत्थ[illegible]मेनं सुविरूढमूलमसं
[illegible] शास्त्रेण दृढेन छि त्वा ॥३॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न नि[illegible] भू
यः ॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥ निर्मानमोहा जितसंगदो
षा अध्यात्मनित्या विनिवृत्त कामाः ॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ने तानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्त्तते ॥ २१ ॥ श्रीभगवानुवाच ॥ प्र
काशं च प्रवृत्तिं च मोहमेव च पाण्डव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥ उदासीन
वदासीनो यो वतिष्ठ. ति नेंगु णै यो न विचाल्यते ॥ गुणा वर्त्तन्त इत्येवं यो वति [illegible]
२३ ॥ सम दुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्य[illegible] प्रियाप्रियो धीरस्तुल्य
निन्दात्म संस्तुतिः २४ । मानापमानयोस्तुल्यस्तुल्यो [illegible] मित्रारिपक्षयोः ॥ स
र्वारम्भ परित्यागी गुणा तीतः स उच्यते ॥ २५ ॥ मां च यो व्यभिचारेण भक्तियोगेन से
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ता [illegible] णा रजसि प्रलयं गत्वा कर्मसंगि [illegible] जा [illegible] त आप्रलीन स्तमसि मूढयोनिषु जायते

कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं [illegible] रजसस्तु फलं दुःखमज्ञानं तमसः फलं

सं जायते ज्ञानं रजसो लोभ एव च [illegible] प्र[illegible] दमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥ ऊ

सत्वस्था मध्ये तिष्ठन्ति राजसाः ॥ ज [illegible] न्यगुणावृत्त [illegible] स्था अधो गच्छन्ति तामसा

ना न्यं गुणेभ्यः कर्तारं यदा द्रष्टा [illegible] पश्यति ॥ ग [illegible] णोभ्यश्च परं वेत्ति मद्भा

[illegible] गच्छति ॥१९॥ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ॥ जन्ममृत्युजरादुः

[illegible] मृतमश्नुते ॥२०॥ अर्जुन उवाच ॥ कैर्लिङ्गैस्त्रीन्गुणाना

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विद्धि मोहजं सर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ सत्त्वं सु
खे संजयति रजः कर्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥ रजस्तमश्चा
भिभूय सत्त्वं भवति [illegible] भारत ॥ रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥ सर्वद्वा
रेषु देहेऽस्मिन्प्रकाश [illegible] उपजायते ॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥
लोभः प्रवृत्तिरा [illegible] रंभः कर्मणामशमः स्पृहा ॥ रजस्येतानि जायन्ते विव
र्द्धे भरतर्षभ ॥ १२ ॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥ तमस्येतानि जायन्ते विवृद्धे
कुरुनन्दन ॥ १३ ॥ यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्तमविदां लोकानमलान्

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प[illegible]त्वा[illegible]न्नयेः सर्वे परां सिद्धिमितो गताः ॥ [illegible]दं [illegible]ानमुपाश्रित्य मम साधर्म्यमागताः

स[illegible]पि नो[illegible]पजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥ म[illegible]म योनिर्महद्ब्रह्म तस्मिन्[illegible]र्भं दधाम्यहं । सं

भ[illegible]ः सर्वभूतानां   सं ततो भवति [illegible]ारत ॥ ३ ॥ सर्वयोनिषु कौन्तेय मूर्तयः संभवं

ति [illegible] ॥ तासां ब्रह्म   महद्योनिरहं बी[illegible]प्रदः पिता ॥ ४ ॥   सत्वं रजस्तम इति [illegible]

णाः प्र[illegible]ृति संभवा   ॥ निबध्नन्ति महाबा[illegible]ो देहे देहि[illegible]   नमव्ययं ॥ ५ ॥ तत्र स

त्वं निर्म[illegible]लत्वात्प्रकाशक[illegible]नामयं ॥ सुखसंगेन बध्नाति ज्ञानसंगेन दान[illegible] द, रजो

रागात्मकं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनां ॥ ७ ॥ तम

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रं स पश्यति ॥३०॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म सं
पद्यते तदा ॥३१॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोऽपि कौन्तेय न क
[illegible] लिप्यते ॥३२॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ स[illegible]
तो देहे तथात्मा नोपलिप्यते ॥३३॥ यथा प्रकाश[illegible] त्येकः कृत्स्नं लोकमि
मं रविः ॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३४॥ क्षेत्रक्षेत्रज्ञयो
रेवमन्तरं ज्ञानचक्षुषा ॥ भूतप्र[illegible]तिमोक्षं च ये विदुर्यान्ति ते परं ॥३५॥ इति
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योग[illegible]शास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञ
[illegible]गो नाम त्रयोदशोऽध्यायः ॥ श्रीभगवानुवाच ॥ परं भू[illegible]ः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ति चाप्युक्तो देहेस्मिन्पुरुषः परः॥२३॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह॥ सर्वथा वर्त

मानोपि न स भूयोभिजायते॥२४॥ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना॥ अन्ये सांख्येन

योगेन कर्मयोगे न चापरे॥२५॥ अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते

तेपि चातितरन्त्ये व मृत्युं श्रुतिपरायणाः॥२६॥ यावत्संजायते किंचि

त्सत्वं स्थावरजंगमं॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥२७॥ स

मं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं॥ विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्य

ति॥२८॥ समं पश्यन्हि सर्वत्र समवस्थितमीश्वरं॥ न हिनस्त्यात्मनात्मानं ततो याति परां

गतिं॥२९॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः॥ यः पश्यति तथात्मानमकर्तारं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

तं भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१७॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितं ॥१८॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥ मद्भ
क्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१९॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभा
वपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥२०॥ कार्यकारणक
र्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरु
च्यते ॥२१॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ॥ कारणं गुणसंगोऽस्य
सदसद्योनिजन्मसु ॥२२॥ उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ॥ परमात्मे

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥११॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा
॥१२॥ ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म नस
त्तन्नासदुच्यते ॥१३॥ सर्वतः पाणिपादं तत्सर्व तोक्षिशिरोमुखं ॥ सर्व
तः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१४॥ सर्वेन्द्रि गुणाभासं सर्वेन्द्रियवि
वर्जितं ॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१५॥ बहिरन्तश्च भूतानामचरं चरमे
व च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१६॥ अविभक्तं च भूतेषु विभक्तमिव च स्थि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च॥ इंद्रियाणि दशैकं च पंच चेंद्रिय
गोचराः॥६॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः॥ एतत्क्षेत्रं समासेन
सविकारमुदाहृतं॥७॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं॥ आचार्यो
५२ पासनं शौचं स्थैर्यमात्मविनिग्रहः॥८॥ इंद्रियार्थेषु वैराग्यमन
हंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥९॥ असक्तिर
नभिष्वंगः पुत्रदारगृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥१०॥ मयि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यांगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥ अर्जुन उवाच ॥ प्रकृतिं
पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ १ ॥ श्रीभग
वानुवाच ॥ इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्रा
हुः क्षेत्रज्ञमिति तद्विदः ॥ २ ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रे
षु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ ३ ॥ तत्क्षेत्रं यच्च
यादृक् च यद्विकारि यतश्च यत् ॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ४ ॥ ऋषि
भिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जते च यः॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥ अनपेक्षः शुचिर्दक्ष उदासी
नो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः॥१६॥ यो न हृष्यति न द्वेष्टि
न शोचति न कांक्ष ति॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥ समश्श
५१ त्रौ च मित्रे च तथा मानावमानयोः॥ शीतोष्णसुखदुःखेषु समः संगविवर्जि
तः॥१८॥ तुल्यनि न्दास्तुतिर्मौनी संतुष्टो येन केनचित्॥ अनिकेतस्थिरमतिः
र्भक्तिमान्मे प्रियो न रः॥१९॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते॥ श्रद्दधा
ना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नततो मामिच्छाप्तुं धनंजय ॥९॥ अभ्यासेप्यसमर्थोसि मत्कर्म्मपरमो भव ॥ मदर्थमपि
कर्म्माणि कुर्व्वन्सिद्धिमवाप्स्यसि ॥१०॥ अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः ॥ सर्व्व
कर्म्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं
विशिष्यते । ध्यानात्कर्म्मफलत्यागस्त्यागाच्छान्तिरनन्तरं ॥१२॥ अ
द्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ॥ निर्म्ममो निर
हङ्कारः समदुःखसुखः क्षमी ॥१३॥ सन्तुष्टः सततं योगी यतात्मा दृढनिश्च
यः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥ यस्मान्नोद्विजते लोको लोकान्नोद्वि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

...रातिः॥ स्रद्ध... रयोपेतास्ते मे युक्ततमा मताः॥२॥ ये त्वक्षरमनिर्द्देश्यमव्यक्तं
...पर्युपासते॥ सर्व्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं॥३॥ सन्नियम्येंद्रियग्रामं सर्व्वत्रसम
बुद्धयः॥ ते प्राप्नुवंति मामेव सर्व्वभूतहिते रताः॥ क्लेशोधिकतरस्तेषाम
व्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥५॥ ये तु सर्व्वा
णि कर्म्माणि मयि संन्यस्य मत्पराः॥ अनन्येनैव योगेन मां ध्यायंत उपास
ते॥६॥ तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्॥ भवामि नचिरात्पार्थ मय्यावेशि
तचेतसां॥७॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय॥ निवसिष्यसि मय्ये
व अत ऊर्ध्वं न संशयः॥८॥ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं॥ अभ्यासयोगे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शीनकांक्षिणः ॥५२॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्ट
वानसि मां यथा ॥५३॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन
प्रवेष्टुं च परंतप ॥५४॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः
सर्वभूतेषु यः स मा मेति पाण्डव ॥५५॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैका
दशोऽध्यायः ॥ अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्ष
रमव्यक्तं तेषां के योगवित्तमाः ॥१॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः॥ एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कु
रुप्रवीर॥४८॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं॥ व्यपेतभीः
प्रीतमनाः पुनस्तं तदेव मे रूपमिदं प्रपश्य॥४९॥ संजय उवाच॥ इत्यर्जु
नं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः॥ आश्वासयामास च
भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥५०॥ अर्जुन उवाच॥ दृष्ट्वेदं मानुषं
रूपं तव सौम्यं जनार्दन॥ इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥५१॥ श्रीभ
गवानुवाच॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम॥ देवा अप्यस्य रूपस्य नित्यं द

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महमीशमीड्यं॥ पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं॥४४॥ अ
दृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे॥ तदेव मे दर्शय देव रूपं प्रसी
द देवेश जगन्निवास॥४५॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं त
थैव॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥४६॥ श्रीभग
वानुवाच॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्॥ ते
जोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं॥४७॥ नवेदयज्ञाध्यय

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प. वृ त स्तो न गो स्कः ते र धृ त त त र स्त वा॥

गो गोमि त वि क्र म स्त्वं सर्वं॥ स मा प्नोषि त तो सि स र्व॥ ५॥ स खे ति म त्वा प्र स भं य दु क्तं

हे कृ ष्ण हे या द व हे स खे ति॥ अ जा न ता म हि मा नं त वे दं म या प्र मा दात्प्र ण

ये न वापि॥ ४१॥ य च्चा प हा सा र्थं म स त्कृ तो सि वि हा र श य्या स न भो ज ने षु

ए को थ वा प्य च्यु त त त्स म क्षं त त्क्षा म ये त्वा म ह म प्र मे यं॥ ४२॥ पिता

सि लो क स्य च रा च र स्य त्व म स्य पू ज्य श्च गु रु र्ग री या न्॥ न त्व त्स मो स्त्य भ्य धि कः

कु तो न्यो लो क त्र ये प्य प्रति म प्र भा व॥ ४३॥ त स्मा त्प्र णा म्य प्र णि धा य का यं प्र सा द ये त्वा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ता [illegible] ॥ ३५ ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि [illegible]
नि[illegible] शो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न नमेरन्महात्मन्
ग[illegible]यसे ब्रह्मणो प्यादिकर्त्रे ॥ अनन्त देवेश जगन्निवास त्वमक्षरं स
दसत्तत्परं यत् ३७ ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य
परं निधानं ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्त
रूप ॥ ३८ ॥ वायुर्यमोग्निर्वरुणः शशाङ्कः प्रजा[illegible]ति स्त्वं प्रपितामहश्च
नमो नमस्ते स्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते ॥ ३९ ॥ नमः पुरस्तादथ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वप्रहति॥३१॥ श्रीभगवानुवाच॥ कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तु
मिह प्रवृत्तः॥ ऋतेपि त्वां न भविष्यन्ति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः॥३२॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धं॥ मयैवैते
निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥३३॥ द्रोणं च भीष्मं
जयद्रथं च कर्णं तथान्यानपि योधवीरान्॥ मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान्॥३४॥ संजय उवाच॥ एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी॥ नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीत

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥ यथा नदीनां बहवोम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ॥ तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्व
लन्ति ॥ २८ ॥ यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः
स्तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥ ले
लिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य
जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्र
रूपो नमोस्तु ते देववर प्रसीद ॥ विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्ठालोकाः प्रव्यथितास्तथाहं ॥ २३ ॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दी
प्तविशालनेत्रं । दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो
॥ २४ ॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥
अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥
। भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ॥ केचिद्विलग्ना द

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेज
सा विश्वमिदं तपन्तं॥१९॥ द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः॥ दृ
ष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं म्महात्मन्॥२०॥ अमी हि त्वां सुर
संघा विशन्ति केचिद्भीताः प्रांजलयो गृणन्ति॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति
त्वां स्तुतिभिः पुष्कलाभिः॥२१॥ रुद्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरुतश्चो
ष्मपाश्च॥ गंधर्वयक्षासुरसिद्धसंघाः वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥२२॥ रूपं म
हत्ते बहुवक्त्रनेत्रं म्महाबाहो बहुबाहूरुपादं॥ बहूदरं बहुदंष्ट्राकरालं दृ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रसा देवं कृतांजलिरभाषत ॥१४ अर्जुन उवाच ॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूत
तविशेषसंघान् ॥ ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपं ॥ नान्तं न मध्यं न पुन
स्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥१६॥ किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तं ॥ पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानला
र्कद्युतिमप्रमेयं ॥१७॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं
निधानं ॥ त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥ अना

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पश्य मे योगमैश्वरं ॥ ८ ॥ संजय उवाच ॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ॥ दर्शया
मास पार्थाय परमं रूपमैश्वरं ॥ ९ ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अने
कदिव्याभरणं दिव्यानेकोद्यतायुधं ॥ १० ॥ दिव्यमाल्याम्बरधरं दिव्यग
न्धानुलेपनं ॥ सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखं ॥ ११ ॥ दिवि सूर्य
सहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य म
हात्मनः ॥ १२ ॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस
शरीरे पाण्डवस्तदा ॥ १३ ॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ॥ प्रणम्य शि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गतो मम ॥१॥ भवाप्ययौ हि भूतानाँ श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहात्म्यमपि चा
व्ययं ॥२॥ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषो
त्तम ॥३॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं
२५ दर्शयात्मानमव्ययं ॥४॥ श्रीभगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशो
ऽथ सहस्रशः ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥ पश्या
दित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि
भारत ॥६॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम देहे गुडाकेश यच्चान्यद्
द्रष्टुमिच्छसि ॥७॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं ददामि ते चक्षुः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

तदहमर्जुन॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरं॥ ३९॥ नान्तोऽस्ति मम दिव्यानां विभू
तीनां परंतप॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥ यद्यद्विभूतिमत्सत्वं
श्रीमदूर्जितमेव वा॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं॥ ४१॥ अथवा
बहुनैतेन किं ज्ञातेन तवार्जुन॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थि
तो जगत्॥ ४२॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतिविस्तारयोगो नाम दशमो ध्यायः॥ अर्जुन
उवाच॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं॥ यत्त्वयोक्तं वचस्तेन मोहोयं वि
CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सामासिकस्य च॥ अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥३३॥ मृत्युः सर्वहरश्चाह
मुद्भवश्च भविष्यतां॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥३४॥ बृहत्साम तथा
सामांगायत्री छंद सामहं॥ मासानां मार्गशीर्षोह[मृतू]नां कुसुमाकरः॥३५॥ द्यू
३३ तं छलयतामस्मि तेजस्तेजस्विनामहं॥ जयोस्मि व्यवसायोस्मि सत्वं
सत्ववतामहं॥३६॥ वृष्णीनां वासुदेवोस्मि पाण्डवानां धनंजयः॥ मुनीनां
मप्यहं व्यासः कवीनामुशना कविः॥३७॥ दण्डो दमयतामस्मि नीतिरस्मि जि
गीषतां॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं॥३८॥ यच्चापि सर्वभूतानां बीजं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥१९॥ अहमा
त्मा गुडाकेश सर्वभूताशयस्थितः॥ अहमादिश्च मध्यं च भूतानामन्त एव च॥२०॥ आदित्याना
महं विष्णुर्ज्योतिषां रविरंशुमान्॥ मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी
३१ ॥२१॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः॥ इन्द्रियाणां मनश्चास्मि
भूतानामस्मि चेतना॥२२॥ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्ष
10 सां॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं॥२३॥ पुरोधसां च मुख्यं मां वि
द्धि पार्थ बृहस्पतिं॥ सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥२४॥ महर्षीणां भृगुरहं गि
रामस्म्येकमक्षरं॥ यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥२५॥ अश्वत्थः सर्ववृक्षा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

त्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥ अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् । पु
रुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥१२॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो दे
वलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भ
गवन्व्यक्तिं विदुर्देवा न दानवाः ॥१४॥ स्वयमेवात्मना त्मानं वेत्थ त्वं पुरुषोत्त
म ॥ भूतभावन भूतेश देवदेव जगत्पते ॥१५॥ वक्तु मर्हस्यशेषेण दिव्या
ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य ष्ठसि ॥१६॥ कथं विद्यामह
हं योगिंस्त्वां सदा परिचिं यन् ॥ केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१७॥ विस्तरेणात्मनो
योगं विभूतिं च ज यः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं ॥१८॥ अर्जुन उवाच ॥ ह
श्रीभगवा

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्ज्ञानमसम्मोहः क्ष[...] मः शमः॥ सुखं दुःखं भवोभावो भयं चा[...]यमेव च॥४॥ अहिंसा स
मता तुष्टिस्तपो दानं य[...] यशः॥ भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥५॥ महर्षयः
सप्त पूर्वे चत्वारो मनवस्तथा॥ मद्भावा मानसा जा[...] येषां लोक इमाः प्रजाः
३१ ६॥ एतां विभूतिं यो गं च मम यो वेत्ति तत्त्वतः॥ सोऽवि[...] कंपेन योगेन युज्यते
नात्र संशयः॥७॥ अहं सर्वस्य प्रभवो मत्तः सर्वं [...] प्रवर्त्तते॥ इति मत्वा भ
जन्ते मां बुधा भावस मच्छित्ताः॥८॥ मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परं॥ कथय
न्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥९॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं॥ ददामि बु
द्धियोगं तं येन मामुपयान्ति ते॥१०॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः॥ नाशयाम्यात्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१॥ मांहि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं॥३२॥
किं पुनर्ब्राह्मणाः पुण्याभक्ताराजर्षयस्तथा॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां॥३३॥
मन्मनाभव मद्भक्तो मद्याजी मान्नमस्कुरु॥ मामेवैष्यसि युक्त्वैव मात्मानं मत्परायण
णः॥३४॥ इति श्रीमद्भग वद्गीतासूपनिषत्सु ब्रह्मविद्यायां यो गशास्त्रे श्रीकृष्णार्जुनसं
वादे राजगुह्ययो गो नाम नवमोध्यायः॥ श्रीभगवा नुवाच॥ भूय एव महा
बाहो शृणु मे परमं वचः॥ यत्तेहं प्रीयमाणाय वक्ष्यामि हि तकाम्यया॥१॥ न मे विदुः
सुरगणाः प्रभवन्न महर्षयः॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः॥२॥ यो मामज
नादिं च वेत्ति लोकमहेश्वरं॥ असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥३॥ बुद्धि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

...जानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥ यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ॥ भूतानि यान्ति
भूतेज्या यान्ति मद्याजिनोऽपि मां ॥२५॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्ना
श्री मि प्रयतात्मनः ॥२६॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौ
न्तेय तत्कुरुष्व मद र्पणं ॥२७॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ॥ सं
३० न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥ समोऽहं सर्वभूतेषु न मे द्वे
गी ष्योऽस्ति न प्रियः ॥ ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहं ॥२९॥ अपि चेत्सुदुरा
चारो भजते मामनन्यभाक् ॥ साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ॥ कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मोंकार ऋक्साम यजुरेव च ॥१७॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥ प्रभवः प्र
लयः स्थानं निधानं बीजमव्ययं ॥१८॥ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव
मृत्युश्च सदसच्चा हमर्जुन ॥१९॥ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रा
र्थयन्ते ॥ ते पुण्यमासा द्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥ ते तं भु
क्त्वा स्वर्गलोकं विशा लं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ॥ एवं त्रयीधर्ममनुप्रप
न्ना गतागतं काम कामा लभन्ते ॥२१॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ॥
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥२२॥ येप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ॥ तेपि
मामेव कौन्तेय यजन्त्यविधिपूर्वकं ॥२३॥ अहं हि सर्वधर्म्माणां भोक्ता च प्रभुरेव च ॥ न तु माम
यज्ञा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

राप्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥१०॥ अवजान
ति मां मूढा मानुषीं तनुमाश्रितं ॥ परं भावमजानंतो मम भूतमहेश्वरं ॥११॥ मोघाशा मो
घकर्म्माणो मोघज्ञाना विचेतसः ॥ राक्षसीमासुरींचैव प्रकृतिं मोहिनींश्रि
२९ ताः ॥१२॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥ भजंत्यनन्यमनसो
ज्ञात्वा भूतादिमव्ययं ॥१३॥ सततं कीर्त्तयंतो मां यतंतश्च दृढव्रताः ॥ नमस्यंत
श्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥ ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ॥ ए
कत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं ॥१५॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मं
त्रोहमहमेवाज्यमहमग्निरहं हुतं ॥१६॥ पितामहस्य जगतो माता धाता पितामहः ॥ वेद्यं पवित्र

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्यावगमधर्म्यं सुसुखं कर्तुमव्ययं ॥२॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप । अप्रा
प्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्था
नि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥ न च मत्स्थानि भूतानि पश्य मे योगमै
श्वरं । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥ यथाकाशस्थितो नित्यं वा
युः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानी[illegible]त्युपधारय ॥६॥ सर्वभूता
नि कौन्तेय प्रकृतिं यान्ति मामिकां । कल्पक्षये पुनस्तानि [illegible]ल्पादौ विसृजाम्यहं ॥७॥ प्रकृ
तिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥ न च मां
तानि कर्माणि निबध्नन्ति धनंजय । उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥ मयाध्यक्षे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः ॥२६॥ नैते
सृती पार्थ जानन्योगी मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥
वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥ अत्येति तत्सर्वमि
१२ दं विदित्वा योगी परं स्थानमुपैति चाद्यं ॥२८॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे महापुरुषयोगो नामाष्टमोऽध्या
यः ॥ श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञान
सहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शः पार्थ प्रभवत्यहरागमे ॥१९॥ परस्तस्मात्तु भावोन्योव्यक्तोव्यक्तात्सनातनः ॥ यः स सर्वेषु
भूतेषु नश्यत्सु न विनश्यति ॥२०॥ अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं ॥ यं प्राप्य न नि
वर्त्तन्ते तद्धाम पर मम्मम ॥२१॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्य
या ॥ यस्यान्तस्थानि भूतानि येन सर्वमिदं ततं ॥२२॥ यत्र काले त्वनावृत्तिमावृ
त्तिं चैव योगिनः ॥ प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥ अग्निर्ज्योतिरहः
शुक्लः षण्मासा उत्तरायणं ॥ तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥ धूमो रात्रिस्तथा
कृष्णः षण्मासा दक्षिणायनं ॥ तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥२५॥ शुक्लकृष्णे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

याति त्यजद्देहं स याति परमां गतिं ॥१३॥ अनन्यचेताः सततं यो मां स्मरति नि
त्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥ मामुपेत्य पुनर्ज्जन्म दुःखाल
यमशाश्वतं ॥ नापु वन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥ आब्रह्मभुवना
ल्लोकाः पुनरावर्त्ति नोर्ज्जुन ॥ मामुपेत्य तु कौन्तेय पुनर्ज्जन्म न विद्यते ॥१६॥
सहस्रयुगपर्यन्त महर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रान्तां ते होरा
त्रविदो जनाः ॥१७॥ अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे ॥ रात्र्यागमे प्र
लीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥७॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८॥ कविं पुराणमनुशासितारमणोरणीयां
समनुस्मरेद्यः ॥ सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः पर
स्तात् ॥९॥ प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ॥
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥१०॥ यदक्ष
रं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ॥ यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥११॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्याधाया
त्मनः प्राणमास्थितो योगधारणाम् ॥१२॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्र

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गो नाम सप्तमोऽध्यायः॥ अर्ज्जुन उवाच॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म्म पुरुषोत्तम॥ अधिभू
तं च किं प्रोक्तमधिदैवं किमुच्यते॥१॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन॥ प्रयाणकाले
च कथं ज्ञेयोऽसि नि यतात्मभिः॥२॥ श्रीभगवानुवाच॥ अक्षरं ब्रह्म परमं स्वभावो
१९ ध्यात्ममुच्यते॥ भू तभावोद्भवकरो विसर्गः कर्म्म संज्ञितः॥३॥ अधिभू
6) तं क्षरो भावः पु रुषश्चाधिदैवतं॥ अधियज्ञो हमेवात्र देहे देह
भृतां वर॥४॥ अन्त काले च मामेव स्मरन्मुक्त्वा कलेबरं॥ यः प्रयाति स म
द्भावं याति नास्त्यत्र संशयः॥५॥ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरं॥ तं तमेवैति
कौन्तेय सदा तद्भावभावितः॥६॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्धयः॥ परं भावमजानन्तो ममा व्ययमनुत्तमं॥२४॥ नाहं प्रकाशः सर्वस्य योगमायासमा
वृतः॥ मूढोयं नाभिजानाति लोको माममजमव्ययं॥२५॥ वेदाहं समतीतानि वर्तमानानि
चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन॥२६॥ इच्छाद्वेषसमुत्थेन द्वन्द्वमो
हेन भारत। सर्वभूता नि सम्मोहं सर्गे यान्ति परन्तप॥२७॥ येषां त्वन्तगतं पापं
जनानां पुण्यकर्मणां ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥२८॥ जरामर
णमोक्षाय मामाश्रि त्य यतन्ति ये। ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं॥२९॥
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः॥ प्रयाणकालेपि च मां ते विदुर्युक्तचेतसः॥३०॥ इति
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयो

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ति नोर्जुन॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥१६॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥ प्र
यो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः॥१७॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं॥ आस्थितः स हि यु
क्तात्मा मामेवानुत्तमां गतिं॥१८॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते॥ वासुदेवः सर्वमि
२५ ति स महात्मा सुदुर्लभः॥१९॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेन्यदेवताः॥ तं तं नियम
मास्थाय प्रकृत्या नियताः स्वया॥२०॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥ त
स्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥२१॥ स तया श्रद्धया युक्तस्तस्याराधनमी
हते॥ लभते च ततः कामान्मयैव विहितान्हि तान्॥२२॥ अन्तवत्तु फलं तेषां तद्भवत्यल्पमेध
सां॥ देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि॥२३॥ अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबु

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो गंधः पृथिव्यां च तेजश्चा
स्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनात
नं । बुद्धिर्बुद्धिमताम स्मि तेजस्तेजस्विनामहं ॥ १० ॥ बलं बलवतां चाहं कामरागविव
र्जितं । धर्माविरुद्धो भू तेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥ ये चैव सात्विका भावा राजसा
स्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ त्रिभिर्गुणमयैर्भावैरे
भिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययं ॥ १३ ॥ दैवी ह्येषा गु
णमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यन्ते मायामेतां तरंति ते ॥ १४ ॥ न मां दुःष्कृतिनो मूढाः प्र
पद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥ चतुर्विधा भजन्ते मां जनाः सुकृ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

यथा ज्ञास्यसि तच्छृणु ॥१॥ ज्ञानं तेहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोन्यज्ज्ञातव्यमवशिष्यते ॥२॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥३॥ भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥५॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥ रसोहमप्सु कौन्तेय प्रभा

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्रं बुद्धिसंयोगं लभते पौर्वदेहिकं॥ यततेच ततो भूयः संसिद्धौ कुरुनन्दन॥४३॥ पूर्वाभ्यासेन तेनैव
ह्रियते ह्यवशोपि सः। जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥४४॥ प्रयत्नाद्यतमानस्तु योगी संशुद्ध
किल्बिषः। अनेक जन्मसंसिद्धस्ततो याति परां गतिं॥४५॥ तपस्विभ्योधिको योगी ज्ञानि
भ्योपि मतोधिकः। क र्मिभ्यश्चाधिको योगी तस्माद्योगी भवा र्जुन॥४६॥ योगिनामपि
सर्वेषां मद्गतेनान्त रात्मना॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥४७॥ इति
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोध्या
यः॥६॥ श्रीभगवानुवाच॥ मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः॥ असंशयं समग्रं मां

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प इति मे मतिः॥ वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥३६॥ अर्जुन उवाच॥ अयतिः श्र
द्धयोपेतो योगाच्चलितमानसः॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति॥३७॥ कच्चिन्नोभयविभ्रष्ट
श्छिन्नाभ्रमिव नश्यति॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥३८॥ एतन्मे संश
२२ यं कृष्ण छेत्तुमर्हस्यशेषतः॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥३९॥
श्रीभगवानुवाच॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते॥ नहि कल्याणकृत्कश्चिद्दु
र्गतिं तात गच्छति॥४०॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योग
भ्रष्टोऽभिजायते॥४१॥ अथवा योगिनामेव कुले भवति धीमतां॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशं॥४२॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥ यो मां पश्यति सर्व
त्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥ सर्वभूतस्थि
तं यो मां भजत्ये कत्वमास्थितः ॥ सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥
३१ ॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी
परमो मतः ॥ ३२ ॥ अर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥
एतस्याहं न पश्या मि चञ्चलत्वात्स्थितिं स्थिरां ॥ ३३ ॥ चञ्चलं हि मनः कृष्ण प्रमाथि बल
वद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥ ३४ ॥ श्रीभगवानुवाच ॥ असंशयं महाबाहो म
नो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो दुष्प्रा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्यते नाधिकं ततः॥ यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते॥२२॥ तं विद्याद्दुःखसंयो
गवियोगं योगसंज्ञितं॥ स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा॥२३॥ संकल्पप्रभवान्कामांस्त्यक्त्वा
सर्वानशेषतः॥ मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥२४॥ शनैः शनैरुपरमेद्बु
११ द्ध्या धृतिगृहीतया॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्॥२५॥ यतो यतो
निश्चरति मनश्चंचलमस्थिरं॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥२६॥ प्रशां
तमनसं ह्येनं योगिनं सुखमुत्तमं॥ उपैति शान्तरजसं ब्रह्मभूतमकल्मषं॥२७॥ युंजन्नेवं
सदात्मानं योगी विगतकल्मषः॥ सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥२८॥ सर्वभूतस्थमा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परमाम्मत्संस्थामधिगच्छति॥१५॥ नात्यश्नतस्तु योगोस्ति न चैकान्तमनश्नतः॥ न चातिस्व
प्नशीलस्य जाग्रतो नैव चार्जुन॥१६॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नाव
बोधस्य योगो भवति दुःखहा॥१७॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते॥ नि
स्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥१८॥ यथा दीपो निवातस्थो नेङ्गते सो
पमा स्मृता॥ योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥१९॥ यत्रोपरमते
चित्तं निरुद्धं योगसेवया॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥२०॥ सुखमात्यन्तिकं य
त्तद्बुद्धिग्राह्यमतीन्द्रियं॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥२१॥ यं लब्ध्वा चापरं लाभम्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्वेष्यबन्धुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥ योगी युञ्जीत सततमात्मानं रहसि स्थि
तः । एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्म
नः ॥ नात्युच्छ्रितं ना तिनीचं चैलाजिनकुशोत्तरं ॥११॥ तत्रैकाग्रं मनः कृत्वा य
२१ तचित्तेन्द्रियक्रियः ॥ उपविश्यासने युञ्ज्याद्योगमा त्मविशुद्धये ॥१२॥ स
मं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चा
नवलोकयन् ॥१३॥ प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः संयम्य मच्चित्तो
युक्त आसीत मत्परः ॥१४॥ युञ्जन्नेवं सदात्मानं योगी नियतमानसः ॥ शान्तिं निर्वाणा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ति कश्चन॥२॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते॥ योगारूढस्य तस्यैव शमः कारणमुच्य
ते॥३॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते॥ सर्वसंकल्पसंन्यासी योगारूढस्त
दोच्यते॥४॥ उद्धरे दात्मनात्मानं नात्मानमवसादयेत्॥ आत्मैव ह्यात्मनो बन्धु
रात्मैव रिपुरात्म नः॥५॥ बन्धुरात्मात्मनस्तस्य ये नात्मैवात्मना जितः॥ अ
नात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्॥६॥ जितात् मनः प्रशान्तस्य परमा
त्मा समाहितः॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥७॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो
विजितेन्द्रियः॥ युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥८॥ सुहृन्मित्रार्युदासीनमध्यस्थ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कल्मषाः ॥ छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥ कामक्रोधवियुक्तानां यतीनां यतचेतसां
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां ॥२६॥ स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ॥ प्राणापा
नौ समौ कृत्वा नासा भ्यन्तरचारिणौ ॥२७॥ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥ भोक्तारं य ज्ञतपसां सर्वलोकमहे
श्वरं सुहृदं सर्वभू तानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥ इति श्रीभगवद्गीतासूप
निषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम पञ्च
मोध्यायः ॥ श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न नि
रग्निर्न चाक्रियः ॥१॥ यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ॥ न ह्यसंन्यस्तसंकल्पो योगी भव

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः
समदर्शिनः ॥१८॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते
स्थिताः ॥१९॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं । स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्म
णि स्थितः ॥२०॥ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं । स ब्रह्मयोगयुक्तात्मा सु
खमक्षयमश्नुते ॥२१॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय
न तेषु रमते बुधः ॥२२॥ शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स
युक्तः स सुखी नरः ॥२३॥ ~~लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः छिन्नद्वैधा~~ योऽन्तःसुखोऽन्तरारामस्त
थान्तर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥ लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणक

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त विवृत॥ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्॥ ८॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमि
षन्नपि॥ इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ९॥ ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ १०॥ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि॥ यो
गिनः कर्म्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥ ११॥ युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नै
ष्ठिकीम्॥ अयुक्तः कामकारेण फले सक्तो निबध्यते॥ १२॥ सर्वकर्म्माणि मनसा संन्यस्या
स्ते सुखं वशी॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥ १३॥ न कर्तृत्वं न कर्म्माणि लोक
स्य सृजति प्रभुः॥ न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥ नादत्ते कस्यचित्पापं न चैव
सुकृतं विभुः॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥ १५॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः॥ ते
षामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ १६॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छन्त्यपुनरावृ

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उवाच॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं॥१॥ श्रीभ
गवानुवाच॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशि
ष्यते॥२॥ ज्ञेयः स नि सः त्यसंन्यासी यो न द्वेष्टि न कांक्षति॥ निर्द्वन्द्वो हि महाबाहो सुखं
बंधात्प्रमुच्यते॥३॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पण्डिताः॥ एकमप्या
स्थितः सम्यगुभयो र्विंदते फलं॥४॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि ग
म्यते॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति॥५॥ संन्यासस्तु महाबाहो दुःखमा
प्तुमयोगतः॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥६॥ योगयुक्तो विशुद्धात्मा विजि
तात्मा जितेंद्रियः॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥७॥ नैव किंचित्करोमीति युक्तो मन्येत

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानाग्निः सर्वकर्माणि भस्मसा[illegible] कुरुते तथा ॥ ३७ ॥ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥ तत्स्वयं यो
गसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥ श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ॥ ज्ञानं लब्ध्वा परां शांति
मचिरेणाधिगच्छ ति ॥ ३९ ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥ नायं लो
१८ कोस्ति न परो न सु खं संशयात्मनः ॥ ४० ॥ योगसंन्य स्तकर्माणं ज्ञानसंछिन्न
संशयं ॥ आत्मवं तं न कर्माणि निबध्नन्ति धनंज य ॥ ४१ ॥ तस्मादज्ञानसं
भूतं हृत्स्थं ज्ञाना सिनात्मनः ॥ छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥ इ
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे चतुर्थोध्यायः ॥ अर्जुन

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्मः ॥३०॥ यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनं ॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥३१॥ एवं ब
हुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥ श्रेयान्द्रव्य
मयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्व
दर्शिनः ॥३४॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ॥ येन भूतान्यशे
षेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥३६॥ यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्रह्मार्प्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ॥२४॥ दैवमे
वापरे यज्ञं योगिनः पर्युपासते। ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥ श्रोत्रादीनी
न्द्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥
१० सर्व्वाणीन्द्रियकर्म्माणि प्राणकर्म्माणि चापरे। आत्मसंयमयोगाग्नौ जुह्व
ति ज्ञानदीपिते ॥२७॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञा
श्च यतयः संशितव्रताः ॥२८॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे। प्राणापानगती रुद्ध्वा प्राणाया
मपरायणाः ॥२९॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति। सर्व्वेप्येते यज्ञविदो यज्ञक्षपितकल्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णो गतिः ॥१७॥ कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः
कृत्स्नकर्म्मकृत् ॥१८॥ यस्य सर्वे समारम्भाः कामसंकल्पवर्ज्जिताः ॥ ज्ञानाग्निदग्धकर्म्माणं त
माहुः पण्डितं बुधाः ॥१९॥ त्यक्त्वा कर्म्मफलासंगं नित्यतृप्तो निराश्रयः ॥ कर्म्मण्यभि
प्रवृत्तोऽपि नैव किंचित्करोति सः ॥२०॥ निराशीर्यतचित्तात्मा त्यक्तसर्वप
रिग्रहः शारीरं केवलं कर्म्म कुर्व्वन्नाप्नोति किल्बिषं ॥२१॥ यदृच्छालाभ
सन्तुष्टो द्वन्द्वातीतो विमत्सरः समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥
२२॥ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः कर्म्म समग्रं प्रविलीयते ॥२३॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वर्त्तेमनुष्याः पार्थसर्वशः॥११॥ कांक्षन्तः कर्मणां सिद्धिं यजंत इह देवताः॥ क्षिप्रं हि मा-
नुषे लोके सिद्धिर्भवति कर्मजा॥१२॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः॥ तस्य कर्त्ता
रमपिमांविद्ध्यक र्त्तारमव्ययं॥१३॥ न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा॥ इ
१८ तिमां योभिजानाति कर्मभिर्न्नसबद्ध्यते॥१४॥ एवं ज्ञात्वा कृतं कर्म्म पूर्वैरपि
७ मुमुक्षुभिः॥ कुरु कर्म्मैव तस्मात्त्वं पूर्वैः पूर्व्वतरं कृतं॥१५॥ किं कर्म्म किमक
र्म्मेति कवयोप्यत्र मोहिताः॥ तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेशुभात्॥
१६॥ कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्म्मणः॥ अकर्म्मणश्च बोद्धव्यं गहनाकर्म्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्म्मयोगोना
मतृतीयोध्यायः ॥ श्रीभगवानुवाच ॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययं ॥ विवस्वान्मन
५ वे प्राह मनुरिक्ष्वा कवेऽब्रवीत ॥१॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः
१४ स कालेनेह मह ता योगो नष्टः परंतप ॥२॥ स एवायम्मया तेद्य योगः
प्रोक्तः पुरातनः ॥ भक्तोसि मे सखा चेति रहस्यं ह्ये तदुत्तमं ॥३॥ अर्जुन उ
वाच ॥ अपरं भव तो जन्म परं जन्म विवस्वतः ॥ कथमेतद्विजानीयां त्वमा
दौ प्रोक्तवानिति ॥४॥ श्रीभगवानुवाच ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥ ताव्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्निर्यथादर्शो मलेन च॥ यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं॥ ३८॥ आवृ
तं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा॥ कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥ ३९॥
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते॥ एतैर्विमोहयत्येष ज्ञानमा
वृत्य देहिनं॥ ४०॥ तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ॥ पाप्मा
नं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं॥ ४१॥ इन्द्रियाणि पराण्याहु
रिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ ४२॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं॥ ४३॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विमूढांस्तान्विद्धि नष्टानचेतसः ॥३२॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प
कृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थि
तौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥३४॥ श्रेयान्स्वधर्मो विगु
णः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥
१४ ३५॥ अर्जुन उवाच । अथ केन प्रयुक्तोयं पापं चरति पूरुषः । अनिच्छन्न
पि वार्ष्णेय बलादिव नियोजितः ॥३६॥ श्रीभगवानुवाच । काम एष क्रोध एष रजोगु
णसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ॥३७॥ धूमेनाव्रियते

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

युक्तः समाचरन् ॥२६॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा
कर्ताहमिति मन्यते ॥२७॥ तत्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु व
र्तन्त इति मत्वा न स ज्जते ॥२८॥ प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ॥ ता
न कृत्स्नविदो मन्दा न्कृत्स्नविन्न विचालयेत् ॥२९॥ मयि सर्वाणि कर्मा
णि संन्यस्याध्यात्म चेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगत
ज्वरः ॥३०॥ ये मे म[...]मिदं नित्यमनुतिष्ठन्ति मानवाः ॥ श्रद्धावन्तो नसूयन्तो
मुच्यन्ते तेपि कर्मभिः ॥३१॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतं ॥ सर्वज्ञान

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णैव हि संसिद्धिमास्थिता जनकादयः॥ लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥२०॥ यद्य
द्दाचरति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥२१॥ न मे पार्थास्ति कर्त
२ व्यं त्रिषु लोकेषु किंच न॥ नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥२२॥ यदि ह्यहं न
१२ वर्तेयं जातु कर्मण्यतन्द्रितः॥ मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥२३॥ उत्सी
देयुरिमे लोका न कुर्यां कर्म चेदहं॥ संकरस्य च कर्ता स्यामुपहन्यामिमाः
प्रजाः॥२४॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत॥ कुर्याद्विद्वांस्तथा सक्तश्चिकीर्षु
र्लोकसंग्रहं॥२५॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां॥ जोषयेत्सर्वकर्माणि विद्वा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तः सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥ १३ ॥ अन्नाद्भवंति भूतानि पर्ज
न्यादन्नसंभवः ॥ यज्ञाद्भवति पर्जन्यो यज्ञः कर्म्मसमुद्भवः ॥ १४ ॥ कर्म्म ब्रह्मोद्भवं विद्धि
ब्रह्माक्षरसमुद्भवं ॥ तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं ॥ १५ ॥
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ॥ अघायुरिन्द्रियारामो
मोघं पार्थ स जीवति ॥ १६ ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥ नैव तस्य कृतेनार्थो ना
कृतेनेह कश्चन ॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥ तस्मादसक्तः स
ततं कार्यं कर्म्म समाचर ॥ असक्तो ह्याचरन्कर्म्म परमाप्नोति पूरुषः ॥ १९ ॥ कर्म्म

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मूढात्मा मिथ्याचारः स उच्यते॥६॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेर्जुन॥ कर्मे
न्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥७॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्य
कर्मणः॥ शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥८॥ यज्ञार्थात्कर्म
१२ णोन्यत्र लोकोयं कर्मबंधनः॥ तदर्थं कर्म कौंतेय मुक्तसंगः
समाचर॥९॥ सहयज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः॥ अनेन
प्रसविष्यध्वमेष वोस्त्विष्टकामधुक्॥१०॥ देवान्भावयतानेन ते देवा भा
वयन्तु वः॥ परस्परं भावयंतः श्रेयः परमवाप्स्यथ॥११॥ इष्टान्भोगान्हि वो देवा दास्यंते य
ज्ञभाविताः॥ तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः॥१२॥ यज्ञशिष्टाशिनः संतो मुच्यं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संवादे सांख्ययोगो नाम द्वितीयोध्यायः ॥ अर्ज्जुन उवाच ॥ ॐ
ज्यायसी चेत्कर्म्मणस्ते मता बुद्धिर्ज्जनार्द्दन । तत्किं कर्म्मणि घोरे मां नियोजयसि केशव ॥ १ ॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ॥ तदेकं वद निश्चित्य येन श्रेयोह
माप्नुयां ॥ २ ॥ श्रीभगवानुवाच ॥ लोकेस्मिं द्विविधा निष्ठा पुरा प्रोक्ता मया
नघ ॥ ज्ञानयोगेन सांख्यानां कर्म्मयोगेन योगिनां ॥ ३ ॥ न कर्म्मणा
मनारम्भान्नैष्कर्म्यं पुरुषोश्नुते ॥ न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
४ ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्म्मकृत् ॥ कार्य्यते ह्यवशः कर्म्म सर्व्वः प्र
कृतिजैर्ग्गुणैः ॥ ५ ॥ कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इन्द्रियार्थान्वि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥
या निशा सर्वभूतानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥६९॥
७ आपूर्यमाणम चलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्॥ तद्वत्कामा यं प्र
११ विशंति सर्वे स शांतिमा प्नोति न कामकामी॥७०॥ विहाय कामान्यः सर्वान्पुमांश्च
७ रति निःस्पृहः नि र्ममो निरहंकारः स शांतिम धिगच्छति॥७१॥ ए
षा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाण
मृच्छति॥७२॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अर्जुन उवाच ॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्थितधीः किं प्रभाषे
त किमासीत व्रजेत किं ॥ ५४ श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
२ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु
१० विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यः सर्वत्रानभिस्ने
हस्तत्तत्प्राप्य शुभाशुभं ॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥ य
दा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ॥ इन्द्रियाणीन्द्रियार्थेभ्यस्त
स्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥ विषया विनिवर्तन्ते निराहारस्य देहिनः ॥ रसवर्जं रसोऽप्य
स्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इन्द्रियाणि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रमाथीनि हरंति प्रसभं मनः ॥६०॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ वशे हि य
स्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगात्सं
जायते कामः कामात्क्रोधोभिजायते ॥६२॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥ रागद्वेषवियुक्तैस्तु विषया
णींद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥ प्रसा
दे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥
६५॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥ न चाभावयतः शांतिरशांतस्य कुतस्सु
खं ॥६६॥ इंद्रियाणांहि चरतां यन्मनोनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥६७॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मा ते संगोस्त्वकर्म्मणि ॥४७॥ योगस्थः कुरु कर्म्माणि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसिद्ध्योः समो भू
त्वा समत्वं योग उच्यते ॥४८॥ दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनंजय ॥ बुद्धौ शरण
मन्विच्छ कृपणाः फलहेतवः ॥४९॥ बुद्धियुक्तो जहातीह उभे सुकृत
दुष्कृते तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलं ॥५०॥ कर्म्मजं बुद्धि
युक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबंधविनिर्म्मुक्ताः पदं गच्छंत्यनाम
यं ॥५१॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

व्यवसायिनां॥४१॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः॥ वेदवादरताः पार्थ
नान्यदस्तीति वादिनः॥४२॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां॥ क्रियाविशेषब
हुलां भोगैश्वर्य गतिं प्रति॥४३॥ भोगैश्वर्यप्रसक्तानां तयापहृतचेत
सां॥ व्यवसाया त्मिका बुद्धिः समाधौ न विधीय ते॥४४॥ त्रैगुण्यविष
या वेदा निस्त्रैगु ण्यो भवार्जुन॥ निर्द्वन्द्वो नित्य सत्वस्थो निर्योगक्षे
म आत्मवान्॥४५॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके॥ तावान्सर्वेषु वेदेषु ब्राह्म
णस्य विजानतः॥४६॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन॥ मा कर्मफलहेतुर्भू

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यास्यसि लाघवं॥३५॥ अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः॥ निन्दन्तस्तव सामर्थ्यं त
तो दुःखतरन्नु किं॥३६॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं॥ तस्मादुत्तिष्ठ कौन्तेय
युद्धाय कृतनिश्च यः॥३७॥ सुखदुःखे लाभालाभौ जयाजयौ॥ ततो युद्धाय युज्य
स्व नैवं पापमवाप्स्यसि॥३८॥ एषा तेभिहिता सांख्ये बुद्धिर्योगेत्वि
मां शृणु॥ बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि॥३९॥ नेहाभि
क्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥
४०॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन॥ बहुशाखा ह्यनन्ताश्च बुद्धयोव्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

२९॥ देही नित्यमवध्योयं देहे सर्व्वस्य भारत तस्मात्सर्व्वाणि भूतानि न त्वं शोचितु
मर्हसि॥३०॥ स्वधर्म्ममपि चावेक्ष्य न विकंपितुमर्हसि॥ धर्म्म्याद्धि युद्धाछ्रेयोन्यत
६३ क्षत्रियस्य न विद्यते॥३१॥ यदृछया चोपपन्नं स्वर्ग्गद्वारमपावृतं॥
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशं॥३२॥ अथ चेत्त्वमिमंध
र्म्यं संग्राममन्न करिष्यसि॥ ततः स्वधर्म्मं कीर्त्तिंच हित्वा पापमवाप्स्यसि॥
३३॥ अकीर्त्तिंचापि भूतानि कथयिष्यन्ति तेव्ययां॥ संभावितस्य चाकीर्त्तिर्म्मरणादतिरि
च्यते॥३४॥ भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः॥ येषांच त्वं बहुमतो भूत्वा
CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्थाणुरचलोयं सनातनः ॥२४॥ अव्यक्तोयमचिं त्योयमविकार्योयमु
च्यते ॥ तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥ अथ चैनं नित्यजातं नि
त्यं वा मन्यसे मृ तं ॥ तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥२६॥ जा
तस्य हि ध्रुवो मृत्युर्ध्रु र्ध्रुवं जन्म मृतस्य च ॥ तस्मा दपरिहार्येर्थे न त्वं शो
चितुमर्हसि ॥२७॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्त
निधनान्येव तत्र का रिदेवना ॥२८॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्व
दति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तो हतं। उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥ न जायते म्रियते वा कदाचिन्ना
यं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतो यं पुराणो न हन्यते हन्यमाने शरी
रे ॥२०॥ वेदाविनाशिनं नित्यं य एनमजमव्ययं। कथं स पुरुषः पार्थ कं
घातयति हन्ति कं ॥२१॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति
नरोऽपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति न
वानि देही ॥२२॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः। न चैनं क्लेदयन्त्यापो न
शोषयति मारुतः ॥२३॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

था देहे कौमारं यौवनं जरा॥ तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥१३॥ मात्रास्प
र्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः॥ आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥१४॥ यं
हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ॥ समदुःखसुखं धीरं सोऽमृतत्वाय क
ल्पते॥१५॥ नासतो विद्यते भावो नाभावो विद्यते सतः॥ उभयोरपि दृ
ष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥१६॥ अविनाशि तु तद्विद्धि येन सर्वमिदं ततं॥ विनाश
मव्ययस्यास्य न कश्चित्कर्तुमर्हति॥१७॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥१८॥ य एनं वेत्ति हन्तारं यश्चैनं मन्य

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गो गतिः ॥१७॥ कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः
कृत्स्नकर्म्मकृत् ॥१८॥ यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्म्माणं त
माहुः पण्डितं बुधाः ॥१९॥ त्यक्त्वा कर्म्मफलासंगं नित्यतृप्तो निराश्रयः ॥ कर्म्मण्यभि
प्रवृत्तोपि नैव किंचित्करोति सः ॥२०॥ निराशीर्यतचित्तात्मा त्यक्तसर्वप
रिग्रहः शारीरं केवलं कर्म्म कुर्वन्नाप्नोति किल्बिषं ॥२१॥ यदृच्छाला
भसंतुष्टो द्वन्द्वातीतो विमत्सरः समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥
२२॥ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः कर्म्म समग्रं प्रविलीयते ॥२३॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥ अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये द्रो
णं च मधुसूदन । इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥ गुरूनह
त्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके । हत्वार्थकामांस्तु गुरूनि
हैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥ न चैतद्विद्मः कतरन्नो गरीयो य
द्वा जयेम यदि वा नो जयेयुः । यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तरा
ष्ट्राः ॥ ६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः । यच्छ्रेयः स्यान्नि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अहो वत महत्पापं कर्तुं व्यवसिता वयं॥ यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः॥४५॥ य
दि मामप्रतीकारमशस्त्रं शस्त्रपाणयः॥ धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥४६
संजय उवाच॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्॥ विसृज्य सशरं चा
पं शोकसंविग्नमानसः॥४७॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषाद योगो नाम प्रथमोध्यायः॥
संजय उवाच॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥ विषीदंतमिदं वाक्यमुवाच म
धुसूदनः॥१॥ श्रीभगवानुवाच॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्यंति लोभोपहतचेतसः॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं॥ ३८॥ कथं न ज्ञेयमस्माभिः पा
पादस्मान्निवर्तितुं॥ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३९॥ कुलक्षये प्रणश्यंति कुल
धर्माः सनातनाः॥ धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत॥ ४०॥ अधर्माभिभवात्कृ
ष्ण प्रदुष्यंति कुलस्त्रियः॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः॥ ४१॥ सं
करो नरकायैव कुलघ्नानां कुलस्य च॥ पतंति पितरो ह्येषां लुप्तपिंडोदकक्रि
याः॥ ४२॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः॥ उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्व
ताः॥ ४३॥ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन॥ नरके नियतं वासो भवतीत्यनुशुश्रुम॥ ४४॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्ण न च राज्यं सुखानि च॥ किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा॥३२॥ येषामर्थे कांक्षितं नो राज्य
भोगाः सुखानि च॥ त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥३३॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः
मातुलाः श्वशुराः पौत्राः स्यालाः संबंधिनस्तथा॥३४॥ एतान्न हंतुमिच्छामि घ्नतोपि मधु
४ सूदन॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५ निहत्य धार्तराष्ट्रा
न्नः का प्रीतिः स्याज्जनार्दन॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिन॥३६॥ तस्मान्नार्हा
वयं हंतुं धार्तराष्ट्रान्स्वबांधवान्॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥३७॥ यद्यप्येतेन प

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥२६॥ श्वशुरान्सुहृदश्चैव
सेनयोरुभयोरपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधून वस्थितान् ॥२७॥ कृपया परया
विष्टो विषीदन्निदम | ब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं ॥
॥२८॥ सीदंति मम गात्रा | णि मुखं च परिशुष्यति वेपथुश्च श | रीरे मे रोमहर्षश्च जायते
॥२९॥ गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०॥ निमि
त्तानि च पश्यामि विपरीतानि केशव ॥ न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ॥३१॥ न कांक्षे विजयं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सेनयोरुभयोर्मध्ये रथं स्थापय मेच्युत ॥ २१ ॥ यावदेतान्निरीक्षेहं योद्धुकामान
वस्थितान् ॥ कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेहं य ए
तेऽत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवा
३ च ॥ एवमुक्तो हृषी केशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये
स्थापयित्वा रथो त्तमं ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां ॥ उवा
च पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान्

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लः सहदेवश्च सुघोषमणिपुष्पकौ ॥१६॥ काश्यश्च परमेष्वासः शिखं
डी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥ द्रुपदो द्रौपदेयाश्च स
र्वशः पृथिवीपते । सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् ॥१८॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् नभश्च पृथिवीं चैव तुमुलो व्य
नुनादयन् ॥१९॥ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनु
रुद्यम्य पाण्डवः ॥२०॥ हृषीकेशं तदा वाक्यमिदमाह महीपते ॥ अर्जुन उवाच ॥

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वाभिरक्षन्तु भवन्तः सर्व एवहि ॥११॥ तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ॥
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ततः शंखाश्च भेर्यश्च पणवानक
गोमुखाः सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३॥ ततः श्वेतै
र्हयैर्युक्ते महति स्यन्दने स्थितौ ॥ माधवः पाण्डवश्चैव दिव्यौ शंखौ प्रदध्मतुः
॥१४॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौण्ड्रं दध्मौ महाशंखं
भीमकर्मा वृकोदरः ॥१५॥ अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः नकु

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥ अस्माकं तु विशिष्टा ये तान्निबोध द्वि
जोत्तम । नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥ भवान्भीष्मश्च कर्णश्च
कृपश्च समितिंजयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥८॥ अ
न्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः
सर्वे युद्धविशारदाः ॥९॥ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमे
तेषां बलं भीमाभिरक्षितम् ॥१०॥ अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्मे

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥१॥ संजय उवाच ॥ दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्त
दा । आचार्यमुपसंग […] म्य राजा वचनमब्रवीत् ॥२॥ पश्यैतां पाण्डुपुत्राणामाचार्य महतीं च
मूं व्यूढां द्रुपदपुत्रेण […] तव शिष्येण धीमता ॥३॥ अत्र शूरा […] महेष्वासा भीमार्जुनस
मा युधि ॥ युयुधा […] नो विराटश्च द्रुपदश्च महारथः ॥४॥ धृष्टकेतुश्चेकितानः काशिराज
श्च वीर्यवान् पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥५॥ युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

षदैर्गायन्ति यं सामगाः॥ ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः॥ ॥ इति न्यासः समाप्तः

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दुर्योधनावर्तिनी सोत्तीर्णा खलु पाण्डवोर्णा वनदीः कौन्तेदर्तकः कोशं वः ॥ ६ ॥ पाराश
र्यो व वः सरोजममलं गीतार्थगंधोत्कटं नानाख्यानककेसरं हरिकथासंबोधना
बोधितं । लोके स ज्जनषट्पदैरहरहः पेपी पमानं मुदा भूया
द्भारतपंकजं कलि मलप्रध्वंसि नः श्रेयसे ॥ ७ ॥ मूकं करोति वा
चालं पंगुं लंघयते गिरिं ॥ यत्कृपा तमहं वन्दे परमानन्दमाधवं ॥
॥ यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः साङ्गपदक्रमोपनि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्तैलं पूर्णः प्रक्षालितो ज्ञानमयः प्रदीपः ॥२॥ प्रपन्नपारिजाताय तोत्रवेत्रैक[illegible]णा
ये ॥ ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥३॥ सर्वोपनिषदो गावो
दोग्धा गोपालनन्दनः ॥ पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्
४॥ वसुदेवसुतं देवं कंसचाणूरमर्दनं ॥ देवकीपरमानन्दं कृ
ष्णं वन्दे जगद्गुरुं ॥५॥ भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला श
ल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्यः सर्वगतस्थाणुरिति कवचाय हुं॥ पश्य मे पार्थ रूपाणि शतात नेत्रत्रयाय

वौषट्॥ नानाविधानि दिव्यानीत्यस्त्राय फट्॥ श्रीकृष्णप्रीत्यर्थे जपे विनियोगः॥ अथ ध्या

नं॥ पार्थाय प्रति बोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पु

राणमुनिना मध्ये महाभारतं॥ अद्वैतामृत वर्षिणीं भगवतीम

ष्टादशाध्यायिनीम म्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीं

॥१॥ नमोस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र॥ येन त्वया भार

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति तर्जनीभ्यां नमः॥ अथ केद्योयमदाह्यायमलोद्योशोष्परावचइति मध्यमाभ्यां नमः॥ नि
त्यःसर्वगतस्था … यांरचलोपंसनातनइति अथ नामिकाभ्यां नमः॥ परं
मेपार्थरूपाणि … रात्तशोथसहस्त्रशइति … कनिष्ठिकाभ्यां न
मः॥ नानाविधा … निदिव्यानिनानावर्णाकृतीनि … निवेतिकरतलक
रपृष्ठाभ्यां नमः … वैनंछिंदंतिशस्त्राणिइतिहृदयायनमः॥ नैनंदे
दहतिपावकइति शिरसे स्वाहा॥ अथ केद्योयमदाह्योयमिति शिखायै वौषट्॥ नि

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशाय नमः॥ श्रीरामाय नमः॥ ॐ अस्य श्रीभगवद्गीतामंत्रस्य भगवान्वे
दव्यास ऋषिरनुष्टुप् छंदः श्रीकृष्णः परमात्मा देवता॥ अशोच्यानन्वशोच
स्त्वं प्रज्ञावादांश्च भाषसेति बीजं॥ सर्वधर्मान्परित्यज्य मा
मेकं शरणं व्रजेति शक्तिः॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्या
मि मा शुचः इति कीलकं॥ नैनं छिंदंति शस्त्राणि नैनं दहति
पावक इति अंगुष्ठाभ्यां नमः॥ न चैनं क्लेदयंत्यापो न शोषयति मारुतं

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Guruvayoor Campus Palm-Leaf Manuscript Collection, Thrissur, Kerela